# Pavamanasuktam from Rigveda

# પવમાનસૂક્તં ઋગ્વેદીય

## Document Information

Text title : Pavamanasuktam 2 from Rigveda Mandala 9

File name : pavamana.itx

Category : sUkta, veda, svara

Location : doc_veda

Author : Vedic Tradition

Proofread by : BS

Latest update : June 11, 2024

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 11, 2024

*sanskritdocuments.org*

## Pavamanasuktam from Rigveda

# પવમાનસૂક્તં ઋગ્વેદીય

ગણાનાં ત્વા ગણપતિં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શૃણ્વન્નૂતિભિઃ સીદ સાદનમ્ ॥ ૨.૦૨૩.૦૧

પ્ર ણો દેવી સરસ્વતી વાજેભિર્વાજિનીવતી ।
ધીનામવિત્ર્યવતુ ॥ ૬.૦૬૧.૦૪

વેદ વાતસ્ય વર્તનિમુરોરૃષ્વસ્ય બૃહતઃ ।
વેદા યે અધ્યાસતે ॥ ૧.૦૨૫.૦૯

શતધારમુત્સમક્ષીયમાણં વિપશ્ચિતં પિતરં વક્ત્વાનામ્ ।
મેળિં મદન્તં પિત્રોરુપસ્થે તં રોદસી પિપૃતં સત્યવાચમ્ ॥ ૩.૦૨૬.૦૯

ઋચો અક્ષરે પરમે વ્યોમન્યસ્મિન્દેવા અધિ વિશ્વે નિષેદુઃ ।
યસ્તન્ન વેદ કિમૃચા કરિષ્યતિ ય ઇત્તદ્વિદુસ્ત ઇમે સમાસતે ॥ ૧.૧૬૪.૩૯

અથ પવમાનસૂક્તમ્ ।

સ્વાદિષ્ઠયા મદિષ્ઠયા પવસ્વ સોમ ધારયા ।
ઇન્દ્રાય પાતવે સુતઃ ॥ ૯.૦૦૧.૦૧

રક્ષોહા વિશ્વચર્ષણિરભિ યોનિમયોહતમ્ ।
દ્રુણા સધસ્થમાસદત્ ॥ ૯.૦૦૧.૦૨

વરિવોધાતમો ભવ મંહિષ્ઠો વૃત્રહન્તમઃ ।
પર્ષિ રાધો મઘોનામ્ ॥ ૯.૦૦૧.૦૩

અભ્યર્ષ મહાનાં (??) દેવાનાં (??) વીતિમન્ધસા ।
અભિ વાજમુત શ્રવઃ ॥ ૯.૦૦૧.૦૪

ત્વામચ્છા ચરામસિ તદિદર્થં (??) દિવેદિવે ।
ઇન્દો ત્વે ન આશસઃ ॥ ૯.૦૦૧.૦૫

પુનાતિ તે પરિસ્રુતં સોમં સૂર્યસ્ય દુહિતા ।
વારેણ શશ્વતા તના ॥ ૯.૦૦૧.૦૬
તમીમણ્વીઃ સમર્ય આ ગૃભ્ણન્તિ યોષણો દશ ।
સ્વસારઃ પાર્યે દિવિ ॥ ૯.૦૦૧.૦૭
તમીં હિન્વન્ત્યગ્રુવો ધમન્તિ બાકુરં દૃતિમ્ ।
ત્રિધાતુ વારણં મધુ ॥ ૯.૦૦૧.૦૮
અભીઉમમઘ્ન્યા ઉત શ્રીણન્તિ ધેનવઃ શિશુમ્ ।
સોમમિન્દ્રાય પાતવે ॥ ૯.૦૦૧.૦૯
અસ્યેદિન્દ્રો મદેષ્વા વિશ્વા વૃત્રાણિ જિઘ્નતે ।
શૂરો મઘા ચ મંહતે ॥ ૯.૦૦૧.૧૦

પવસ્વ દેવવીરતિ પવિત્રં સોમ રંહ્યા ।
ઇન્દ્રમિન્દો વૃષા વિશ ॥ ૯.૦૦૨.૦૧
આ વચ્યસ્વ મહિ પ્સરો વૃષેન્દો દ્યુમ્નવત્તમઃ ।
આ યોનિં ધર્ણસિઃ સદઃ ॥ ૯.૦૦૨.૦૨
અધુક્ષત પ્રિયં મધુ ધારા સુતસ્ય વેધસઃ ।
અપો વસિષ્ટ સુક્રતુઃ ॥ ૯.૦૦૨.૦૩
મહાન્તં ત્વા મહીરન્વાપો અર્ષન્તિ સિન્ધવઃ ।
યદ્ગોભિર્વાસયિષ્યસે ॥ ૯.૦૦૨.૦૪
સમુદ્રો અપ્સુ મામૃજે વિષ્ટમ્ભો ધરુણો દિવઃ ।
સોમઃ પવિત્રે અસ્મયુઃ ॥ ૯.૦૦૨.૦૫
અચિક્રદદ્વૃષા હરિર્મહાન્મિત્રો ન દર્શતઃ ।
સં સૂર્યેણ રોચતે ॥ ૯.૦૦૨.૦૬
ગિરસ્ત ઇન્દ ઓજસા મર્મૃજ્યન્તે અપસ્યુવઃ ।
યાભિર્મદાય શુમ્ભસે ॥ ૯.૦૦૨.૦૭
તં ત્વા મદાય ઘૃષ્વય ઉ લોકકૃત્નુમીમહે ।
તવ પ્રશસ્તયો મહીઃ ॥ ૯.૦૦૨.૦૮
અસ્મભ્યમિન્દવિન્દ્રયુર્મધ્વઃ પવસ્વ ધારયા ।

પર્જન્યો વૃષ્ટિમાઁ ઇવ ॥ ૯.૦૦૨.૦૯
ગોષા ઇન્દો નૃષા અસ્યશ્વસા વાજસા ઉત ।
આત્મા યજ્ઞસ્ય પૂર્વ્યઃ ॥ ૯.૦૦૨.૧૦
એષ દેવો અમર્ત્યઃ પર્ણવીરિવ દીયતિ ।
અભિ દ્રોણાન્યાસદમ્ ॥ ૯.૦૦૩.૦૧
એષ દેવો વિપા કૃતોઽતિ હ્વરાંસિ ધાવતિ ।
પવમાનો અદાભ્યઃ ॥ ૯.૦૦૩.૦૨
એષ દેવો વિપન્યુભિઃ પવમાન ઋતાયુભિઃ ।
હરિર્વાજાય મૃજ્યતે ॥ ૯.૦૦૩.૦૩
એષ વિશ્વાનિ વાર્યા શૂરો યન્નિવ સત્વભિઃ ।
પવમાનઃ સિષાસતિ ॥ ૯.૦૦૩.૦૪
એષ દેવો રથર્યતિ પવમાનો દશસ્યતિ ।
આવિષ્કૃણોતિ વગ્વનુમ્ ॥ ૯.૦૦૩.૦૫
એષ વિપ્રૈરભિષ્ટુતોઽપો દેવો વિ ગાહતે ।
દધદ્રત્નાનિ દાશુષે ॥ ૯.૦૦૩.૦૬
એષ દિવં વિ ધાવતિ તિરો રજાંસિ ધારયા ।
પવમાનઃ કનિક્રદત્ ॥ ૯.૦૦૩.૦૭
એષ દિવં વ્યાસરત્તિરો રજાંસ્યસ્પૃતઃ ।
પવમાનઃ સ્વધ્વરઃ ॥ ૯.૦૦૩.૦૮
એષ પ્રત્નેન જન્મના દેવો દેવેભ્યઃ સુતઃ ।
હરિઃ પવિત્રે અર્ષતિ ॥ ૯.૦૦૩.૦૯
એષ ઉ સ્ય પુરુવ્રતો જજ્ઞાનો જનયન્નિષઃ ।
ધારયા પવતે સુતઃ ॥ ૯.૦૦૩.૧૦
સના ચ સોમ જેષિ ચ પવમાન મહિ શ્રવઃ ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૧
સના જ્યોતિઃ સના સ્વ૧ર્વિશ્વા ચ સોમ સૌભગા ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૨

સના દક્ષમુત ક્રતુમપ સોમ મૃધો જહિ ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૩
પવીતારઃ પુનીતન સોમમિન્દ્રાય પાતવે ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૪
ત્વં સૂર્યે ન આ ભજ તવ ક્રત્વા તવોતિભિઃ ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૫
તવ ક્રત્વા તવોતિભિર્જ્યોક્પશ્યેમ સૂર્યમ્ ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૬
અભ્યર્ષ સ્વાયુધ સોમ દ્વિબર્હસં રયિમ્ ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૭
અભ્યર્ષાનપચ્યુતો રયિં સમત્સુ સાસહિઃ ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૮
ત્વાં યજ્ઞૈરવીવૃધન્પવમાન વિધર્મણિ ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૦૯
રયિં નશ્ચિત્રમશ્વિનમિન્દો વિશ્વાયુમા ભર ।
અથા નો વસ્યસસ્કૃધિ ॥ ૯.૦૦૪.૧૦
સમિદ્ધો વિશ્વતસ્પતિઃ પવમાનો વિ રાજતિ ।
પ્રીણન્વૃષા કનિક્રદત્ ॥ ૯.૦૦૫.૦૧
તનૂનપાત્પવમાનઃ શૃઙ્ગે શિશાનો અર્ષતિ ।
અન્તરિક્ષેણ રારજત્ ॥ ૯.૦૦૫.૦૨
ઈળેન્યઃ પવમાનો રયિર્વિ રાજતિ દ્યુમાન્ ।
મધોર્ધારાભિરોજસા ॥ ૯.૦૦૫.૦૩
બર્હિઃ પ્રાચીનમોજસા પવમાનઃ સ્તૃણન્હરિઃ ।
દેવેષુ દેવ ઈયતે ॥ ૯.૦૦૫.૦૪
ઉદાતૈર્જિહતે બૃહદ્દ્વારો દેવીર્હિરણ્યયીઃ ।
પવમાનેન સુષ્ટુતાઃ ॥ ૯.૦૦૫.૦૫
સુશિલ્પે બૃહતી મહી પવમાનો વૃષણ્યતિ ।

નક્તોષાસા ન દર્શતે ॥ ૯.૦૦૫.૦૬
ઉભા દેવા નૃચક્ષસા હોતારા દૈવ્યા હુવે ।
પવમાન ઇન્દ્રો વૃષા ॥ ૯.૦૦૫.૦૭
ભારતી પવમાનસ્ય સરસ્વતીળા મહી ।
ઇમં નો યજ્ઞમા ગમન્તિસ્રો દેવીઃ સુપેશસઃ ॥ ૯.૦૦૫.૦૮
ત્વષ્ટારમગ્રજાં ગોપાં પુરોયાવાનમા હુવે ।
ઇન્દુરિન્દ્રો વૃષા હરિઃ પવમાનઃ પ્રજાપતિઃ ॥ ૯.૦૦૫.૦૯
વનસ્પતિં પવમાન મધ્વા સમઙ્ગ્ધિ ધારયા ।
સહસ્રવલ્શં હરિતં ભ્રાજમાનં હિરણ્યયમ્ ॥ ૯.૦૦૫.૧૦
વિશ્વે દેવાઃ સ્વાહાકૃતિં પવમાનસ્યા ગત ।
વાયુર્બૃહસ્પતિઃ સૂર્યોઽગ્નિરિન્દ્રઃ સજોષસઃ ॥ ૯.૦૦૫.૧૧
મન્દ્રયા સોમ ધારયા વૃષા પવસ્વ દેવયુઃ ।
અવ્યો વારેષ્વસ્મયુઃ ॥ ૯.૦૦૬.૦૧
અભિ ત્યં મદ્યં મદમિન્દવિન્દ્ર ઇતિ ક્ષર ।
અભિ વાજિનો અર્વતઃ ॥ ૯.૦૦૬.૦૨
અભિ ત્યં પૂર્વ્યં મદં સુવાનો અર્ષ પવિત્ર આ ।
અભિ વાજમુત શ્રવઃ ॥ ૯.૦૦૬.૦૩
અનુ દ્રપ્સાસ ઇન્દવ આપો ન પ્રવતાસરન્ ।
પુનાના ઇન્દ્રમાશત ॥ ૯.૦૦૬.૦૪
યમત્યમિવ વાજિનં મૃજન્તિ યોષણો દશ ।
વને ક્રીળન્તમત્યવિમ્ ॥ ૯.૦૦૬.૦૫
તં ગોભિર્વૃષણં રસં મદાય દેવવીતયે ।
સુતં ભરાય સં સૃજ ॥ ૯.૦૦૬.૦૬
દેવો દેવાય ધારયેન્દ્રાય પવતે સુતઃ ।
પયો યદસ્ય પીપયત્ ॥ ૯.૦૦૬.૦૭
આત્મા યજ્ઞસ્ય રંહ્યા સુષ્વાણઃ પવતે સુતઃ ।
પ્રત્નં નિ પાતિ કાવ્યમ્ ॥ ૯.૦૦૬.૦૮

એવા પુનાન ઇન્દ્રયુર્મદં મદિષ્ઠ વીતયે ।
ગુહા ચિદ્દધિષે ગિરઃ ॥ ૯.૦૦૬.૦૯

અસૃગ્રમિન્દવઃ પથા ધર્મન્નૃતસ્ય સુશ્રિયઃ ।
વિદાના અસ્ય યોજનમ્ ॥ ૯.૦૦૭.૦૧

પ્ર ધારા મધ્વો અગ્રિયો મહીરપો વિ ગાહતે ।
હવિર્હવિષ્ષુ વન્દ્યઃ ॥ ૯.૦૦૭.૦૨

પ્ર યુજો વાચો અગ્રિયો વૃષાવ ચક્રદદ્વને ।
સદ્માભિ સત્યો અધ્વરઃ ॥ ૯.૦૦૭.૦૩

પરિ યત્કાવ્યા કવિર્નૃમ્ણા વસાનો અર્ષતિ ।
સ્વર્વાજી સિષાસતિ ॥ ૯.૦૦૭.૦૪

પવમાનો અભિ સ્પૃધો વિશો રાજેવ સીદતિ ।
યદીમૃણ્વન્તિ વેધસઃ ॥ ૯.૦૦૭.૦૫

અવ્યો વારે પરિ પ્રિયો હરિર્વનેષુ સીદતિ ।
રેભો વનુષ્યતે મતી ॥ ૯.૦૦૭.૦૬

સ વાયુમિન્દ્રમશ્વિના સાકં મદેન ગચ્છતિ ।
રણા યો અસ્ય ધર્મભિઃ ॥ ૯.૦૦૭.૦૭

આ મિત્રાવરુણા ભગં મધ્વઃ પવન્ત ઊર્મયઃ ।
વિદાના અસ્ય શક્મભિઃ ॥ ૯.૦૦૭.૦૮

અસ્મભ્યં રોદસી રયિં મધ્વો વાજસ્ય સાતયે ।
શ્રવો વસૂનિ સં જિતમ્ ॥ ૯.૦૦૭.૦૯

એતે સોમા અભિ પ્રિયમિન્દ્રસ્ય કામમક્ષરન્ ।
વર્ધન્તો અસ્ય વીર્યમ્ ॥ ૯.૦૦૮.૦૧

પુનાનાસશ્ચમૂષદો ગચ્છન્તો વાયુમશ્વિના ।
તે નો ધાન્તુ સુવીર્યમ્ ॥ ૯.૦૦૮.૦૨

ઇન્દ્રસ્ય સોમ રાધસે પુનાનો હાર્દિ ચોદય ।
ઋતસ્ય યોનિમાસદમ્ ॥ ૯.૦૦૮.૦૩

મૃજન્તિ ત્વા દશ ક્ષિપો હિન્વન્તિ સપ્ત ધીતયઃ ।

અનુ વિપ્રા અમાદિષુઃ ॥ ૯.૦૦૮.૦૪

દેવેભ્યસ્ત્વા મદાય કં સૃજાનમતિ મેષ્યઃ ।

સં ગોભિર્વાસયામસિ ॥ ૯.૦૦૮.૦૫

પુનાનઃ કલશેષ્વા વસ્ત્રાણ્યરુષો હરિઃ ।

પરિ ગવ્યાન્યવ્યત ॥ ૯.૦૦૮.૦૬

મઘોન આ પવસ્વ નો જહિ વિશ્વા અપ દ્વિષઃ ।

ઇન્દો સખાયમા વિશ ॥ ૯.૦૦૮.૦૭

વૃષ્ટિં દિવઃ પરિ સ્રવ દ્યુમ્નં પૃથિવ્યા અધિ ।

સહો નઃ સોમ પૃત્સુ ધાઃ ॥ ૯.૦૦૮.૦૮

નૃચક્ષસં ત્વા વયમિન્દ્રપીતં સ્વર્વિદમ્ ।

ભક્ષીમહિ પ્રજામિષમ્ ॥ ૯.૦૦૮.૦૯

પરિ પ્રિયા દિવઃ કવિર્વયાંસિ નપ્ત્યોર્હિતઃ ।

સુવાનો યાતિ કવિક્રતુઃ ॥ ૯.૦૦૯.૦૧

પ્રપ્ર ક્ષયાય પન્યસે જનાય જુષ્ટો અદ્રુહે ।

વીત્યર્ષ ચનિષ્ઠયા ॥ ૯.૦૦૯.૦૨

સ સૂનુર્માતરા શુચિર્જાતો જાતે અરોચયત્ ।

મહાન્મહી ઋતાવૃધા ॥ ૯.૦૦૯.૦૩

સ સપ્ત ધીતિભિર્હિતો નદ્યો અજિન્વદદ્રુહઃ ।

યા એકમક્ષિ વાવૃધુઃ ॥ ૯.૦૦૯.૦૪

તા અભિ સન્તમસ્તૃતં મહે યુવાનમા દધુઃ ।

ઇન્દુમિન્દ્ર તવ વ્રતે ॥ ૯.૦૦૯.૦૫

અભિ વહ્નિરમર્ત્યઃ સપ્ત પશ્યતિ વાવહિઃ ।

ક્રિવિર્દેવીરતર્પયત્ ॥ ૯.૦૦૯.૦૬

અવા કલ્પેષુ નઃ પુમસ્તમાંસિ સોમ યોધ્યા ।

તાનિ પુનાન જઙ્ઘનઃ ॥ ૯.૦૦૯.૦૭

નૂ નવ્યસે નવીયસે સૂક્તાય સાધયા પથઃ ।

પ્રત્નવદ્રોચયા રુચઃ ॥ ૯.૦૦૯.૦૮

પવમાન મહિ શ્રવો ગામશ્વં રાસિ વીરવત્ ।
સના મેધાં સના સ્વઃ ॥ ૯.૦૦૯.૦૯

પ્ર સ્વાનાસો રથા ઇવાર્વન્તો ન શ્રવસ્યવઃ ।
સોમાસો રાયે અક્રમુઃ ॥ ૯.૦૧૦.૦૧

હિન્વાનાસો રથા ઇવ દધન્વિરે ગભસ્ત્યોઃ ।
ભરાસઃ કારિણામિવ ॥ ૯.૦૧૦.૦૨

રાજાનો ન પ્રશસ્તિભિઃ સોમાસો ગોભિરઞ્જતે ।
યજ્ઞો ન સપ્ત ધાતૃભિઃ ॥ ૯.૦૧૦.૦૩

પરિ સુવાનાસ ઇન્દવો મદાય બર્હણા ગિરા ।
સુતા અર્ષન્તિ ધારયા ॥ ૯.૦૧૦.૦૪

આપાનાસો વિવસ્વતો જનન્ત ઉષસો ભગમ્ ।
સૂરા અણ્વં વિ તન્વતે ॥ ૯.૦૧૦.૦૫

અપ દ્વારા મતીનાં પ્રત્ના ઋણ્વન્તિ કારવઃ ।
વૃષ્ણો હરસ આયવઃ ॥ ૯.૦૧૦.૦૬

સમીચીનાસ આસતે હોતારઃ સપ્તજામયઃ ।
પદમેકસ્ય પિપ્રતઃ ॥ ૯.૦૧૦.૦૭

નાભા નાભિં ન આ દદે ચક્ષુશ્ચિત્સૂર્યે સચા ।
કવેરપત્યમા દુહે ॥ ૯.૦૧૦.૦૮

અભિ પ્રિયા દિવસ્પદમધ્વર્યુભિર્ગુહા હિતમ્ ।
સૂરઃ પશ્યતિ ચક્ષસા ॥ ૯.૦૧૦.૦૯

ઉપાસ્મૈ ગાયતા નરઃ પવમાનાયેન્દવે ।
અભિ દેવાઁ ઇયક્ષતે ॥ ૯.૦૧૧.૦૧

અભિ તે મધુના પયોઽથર્વાણો અશિશ્રયુઃ ।
દેવં દેવાય દેવયુ ॥ ૯.૦૧૧.૦૨

સ નઃ પવસ્વ શં ગવે શં જનાય શમર્વતે ।
શં રાજન્નોષધીભ્યઃ ॥ ૯.૦૧૧.૦૩

બભ્રવે નુ સ્વતવસેઽરુણાય દિવિસ્પૃશે ।

સોમાય ગાથમર્ચત ॥ ૯.૦૧૧.૦૪

હસ્તચ્યુતેભિરદ્રિભિઃ સુતં સોમં પુનીતન ।

મધાવા ધાવતા મધુ ॥ ૯.૦૧૧.૦૫

નમસેદુપ સીદત દધ્નેદભિ શ્રીણીતન ।

ઇન્દુમિન્દ્રે દધાતન ॥ ૯.૦૧૧.૦૬

અમિત્રહા વિચર્ષણિઃ પવસ્વ સોમ શં ગવે ।

દેવેભ્યો અનુકામકૃત્ ॥ ૯.૦૧૧.૦૭

ઇન્દ્રાય સોમ પાતવે મદાય પરિ ષિચ્યસે ।

મનશ્ચિન્મનસસ્પતિઃ ॥ ૯.૦૧૧.૦૮

પવમાન સુવીર્યં રયિં સોમ રિરીહિ નઃ ।

ઇન્દવિન્દ્રેણ નો યુજા ॥ ૯.૦૧૧.૦૯

સોમા અસૃગ્રમિન્દવઃ સુતા ઋતસ્ય સાદને ।

ઇન્દ્રાય મધુમત્તમાઃ ॥ ૯.૦૧૨.૦૧

અભિ વિપ્રા અનૂષત ગાવો વત્સં ન માતરઃ ।

ઇન્દ્રં સોમસ્ય પીતયે ॥ ૯.૦૧૨.૦૨

મદચ્યુત્ક્ષેતિ સાદને સિન્ધોરૂર્મા વિપશ્ચિત્ ।

સોમો ગૌરી અધિ શ્રિતઃ ॥ ૯.૦૧૨.૦૩

દિવો નાભા વિચક્ષણોઽવ્યો વારે મહીયતે ।

સોમો યઃ સુક્રતુઃ કવિઃ ॥ ૯.૦૧૨.૦૪

યઃ સોમઃ કલશેષ્વાઁ અન્તઃ પવિત્ર આહિતઃ ।

તમિન્દુઃ પરિ ષસ્વજે ॥ ૯.૦૧૨.૦૫

પ્ર વાચમિન્દુરિષ્યતિ સમુદ્રસ્યાધિ વિષ્ટપિ ।

જિન્વન્કોશં મધુશ્ચુતમ્ ॥ ૯.૦૧૨.૦૬

નિત્યસ્તોત્રો વનસ્પતિર્ધીનામન્તઃ સબર્દુઘઃ ।

હિન્વાનો માનુષા યુગા ॥ ૯.૦૧૨.૦૭

અભિ પ્રિયા દિવસ્પદા સોમો હિન્વાનો અર્ષતિ ।

વિપ્રસ્ય ધારયા કવિઃ ॥ ૯.૦૧૨.૦૮

આ પવમાન ધારય રયિં સહસ્રવર્ચસમ્ ।
અસ્મે ઇન્દો સ્વાભુવમ્ ॥ ૯.૦૧૨.૦૯
સોમઃ પુનાનો અર્ષતિ સહસ્રધારો અત્યવિઃ ।
વાયોરિન્દ્રસ્ય નિષ્કૃતમ્ ॥ ૯.૦૧૩.૦૧
પવમાનમવસ્યવો વિપ્રમભિ પ્ર ગાયત ।
સુષ્વાણં દેવવીતયે ॥ ૯.૦૧૩.૦૨
પવન્તે વાજસાતયે સોમાઃ સહસ્રપાજસઃ ।
ગૃણાના દેવવીતયે ॥ ૯.૦૧૩.૦૩
ઉત નો વાજસાતયે પવસ્વ બૃહતીરિષઃ ।
દ્યુમદિન્દો સુવીર્યમ્ ॥ ૯.૦૧૩.૦૪
તે નઃ સહસ્રિણં રયિં પવન્તામા સુવીર્યમ્ ।
સુવાના દેવાસ ઇન્દવઃ ॥ ૯.૦૧૩.૦૫
અત્યા હિયાના ન હેતૃભિરસૃગ્રં વાજસાતયે ।
વિ વારમવ્યમાશવઃ ॥ ૯.૦૧૩.૦૬
વાશ્રા અર્ષન્તીન્દવોઽભિ વત્સં ન ધેનવઃ ।
દધન્વિરે ગભસ્ત્યોઃ ॥ ૯.૦૧૩.૦૭
જુષ્ટ ઇન્દ્રાય મત્સરઃ પવમાન કનિક્રદત્ ।
વિશ્વા અપ દ્વિષો જહિ ॥ ૯.૦૧૩.૦૮
અપઘ્નન્તો અરાવ્ણઃ પવમાનાઃ સ્વર્દૃશઃ ।
યોનાવૃતસ્ય સીદત ॥ ૯.૦૧૩.૦૯
પરિ પ્રાસિષ્યદત્કવિઃ સિન્ધોરૂર્માવધિ શ્રિતઃ ।
કારં બિભ્રત્પુરુસ્પૃહમ્ ॥ ૯.૦૧૪.૦૧
ગિરા યદી સબન્ધવઃ પઞ્ચ વ્રાતા અપસ્યવઃ ।
પરિષ્કૃણ્વન્તિ ધર્ણસિમ્ ॥ ૯.૦૧૪.૦૨
આદસ્ય શુષ્મિણો રસે વિશ્વે દેવા અમત્સત ।
યદી ગોભિર્વસાયતે ॥ ૯.૦૧૪.૦૩
નિરિણાનો વિ ધાવતિ જહચ્છર્યાણિ તાન્વા ।

અત્રા સં જિઘ્નતે યુજા ॥ ૯.૦૧૪.૦૪
નમીભિર્યો વિવસ્વતઃ શુભ્રો ન મામૃજે યુવા ।
ગાઃ કૃણ્વાનો ન નિર્ણિજમ્ ॥ ૯.૦૧૪.૦૫
અતિ શ્રિતી તિરશ્ચતા ગવ્યા જિગાત્યણ્વ્યા ।
વગ્નુમિયર્તિ યં વિદે ॥ ૯.૦૧૪.૦૬
અભિ ક્ષિપઃ સમગ્મત મર્જયન્તીરિષસ્પતિમ્ ।
પૃષ્ઠા ગૃભ્ણત વાજિનઃ ॥ ૯.૦૧૪.૦૭
પરિ દિવ્યાનિ મર્મૃશદ્વિશ્વાનિ સોમ પાર્થિવા ।
વસૂનિ યાહ્યસ્મયુઃ ॥ ૯.૦૧૪.૦૮
એષ ધિયા યાત્યણ્વ્યા શૂરો રથેભિરાશુભિઃ ।
ગચ્છન્નિન્દ્રસ્ય નિષ્કૃતમ્ ॥ ૯.૦૧૫.૦૧
એષ પુરૂ ધિયાયતે બૃહતે દેવતાતયે ।
યત્રામૃતાસ આસતે ॥ ૯.૦૧૫.૦૨
એષ હિતો વિ નીયતેઽન્તઃ શુભ્રાવતા પથા ।
યદી તુઞ્જન્તિ ભૂર્ણયઃ ॥ ૯.૦૧૫.૦૩
એષ શ઼ૃઙ્ગાણિ દોધુવચ્છિશીતે યૂથ્યોઉ વૃષા ।
નૃમ્ણા દધાન ઓજસા ॥ ૯.૦૧૫.૦૪
એષ રુક્મિભિરીયતે વાજી શુભ્રેભિરંશુભિઃ ।
પતિઃ સિન્ધૂનાં ભવન્ ॥ ૯.૦૧૫.૦૫
એષ વસૂનિ પિબ્દના પરુષા યયિવાઁ અતિ ।
અવ શાદેષુ ગચ્છતિ ॥ ૯.૦૧૫.૦૬
એતં મૃજન્તિ મર્જ્યમુપ દ્રોણેષ્વાયવઃ ।
પ્રચક્રાણં મહીરિષઃ ॥ ૯.૦૧૫.૦૭
એતમુ ત્યં દશ ક્ષિપો મૃજન્તિ સપ્ત ધીતયઃ ।
સ્વાયુધં મદિન્તમમ્ ॥ ૯.૦૧૫.૦૮
પ્ર તે સોતાર ઓણ્યોઉ રસં મદાય ધૃષ્વયે ।
સર્ગો ન તક્ત્યેતશઃ ॥ ૯.૦૧૬.૦૧

ક્રત્વા દક્ષસ્ય રથ્યમપો વસાનમન્ધસા ।
ગોષામણ્વેષુ સશ્ચિમ ॥ ૯.૦૧૬.૦૨
અનપ્તમપ્સુ દુષ્ટરં સોમં પવિત્ર આ સૃજ ।
પુનીહીન્દ્રાય પાતવે ॥ ૯.૦૧૬.૦૩
પ્ર પુનાનસ્ય ચેતસા સોમઃ પવિત્રે અર્ષતિ ।
ક્રત્વા સધસ્થમાસદત્ ॥ ૯.૦૧૬.૦૪
પ્ર ત્વા નમોભિરિન્દવ ઇન્દ્ર સોમા અસૃક્ષત ।
મહે ભરાય કારિણઃ ॥ ૯.૦૧૬.૦૫
પુનાનો રૂપે અવ્યયે વિશ્વા અર્ષન્નભિ શ્રિયઃ ।
શૂરો ન ગોષુ તિષ્ઠતિ ॥ ૯.૦૧૬.૦૬
દિવો ન સાનુ પિપ્યુષી ધારા સુતસ્ય વેધસઃ ।
વૃથા પવિત્રે અર્ષતિ ॥ ૯.૦૧૬.૦૭
ત્વં સોમ વિપશ્ચિતં તના પુનાન આયુષુ ।
અવ્યો વારં વિ ધાવસિ ॥ ૯.૦૧૬.૦૮
પ્ર નિમ્નેનેવ સિન્ધવો ઘ્નન્તો વૃત્રાણિ ભૂર્ણયઃ ।
સોમા અસૃગ્રમાશવઃ ॥ ૯.૦૧૭.૦૧
અભિ સુવાનાસ ઇન્દવો વૃષ્ટયઃ પૃથિવીમિવ ।
ઇન્દ્રં સોમાસો અક્ષરન્ ॥ ૯.૦૧૭.૦૨
અત્યૂર્મિર્મત્સરો મદઃ સોમઃ પવિત્રે અર્ષતિ ।
વિઘ્નન્રક્ષાંસિ દેવયુઃ ॥ ૯.૦૧૭.૦૩
આ કલશેષુ ધાવતિ પવિત્રે પરિ ષિચ્યતે ।
ઉક્થૈર્યજ્ઞેષુ વર્ધતે ॥ ૯.૦૧૭.૦૪
અતિ ત્રી સોમ રોચના રોહન્ન ભ્રાજસે દિવમ્ ।
ઇષ્ણન્સૂર્યં ન ચોદયઃ ॥ ૯.૦૧૭.૦૫
અભિ વિપ્રા અનૂષત મૂર્ધન્યજ્ઞસ્ય કારવઃ ।
દધાનાશ્ચક્ષસિ પ્રિયમ્ ॥ ૯.૦૧૭.૦૬
તમુ ત્વા વાજિનં નરો ધીભિર્વિપ્રા અવસ્યવઃ ।

મૃજન્તિ દેવતાતયે ॥ ૯.૦૧૭.૦૭
મધોર્ધારામનુ ક્ષર તીવ્રઃ સધસ્થમાસદઃ ।
ચારુરૃતાય પીતયે ॥ ૯.૦૧૭.૦૮
પરિ સુવાનો ગિરિષ્ઠાઃ પવિત્રે સોમો અક્ષાઃ ।
મદેષુ સર્વધા અસિ ॥ ૯.૦૧૮.૦૧
ત્વં વિપ્રસ્ત્વં કવિર્મધુ પ્ર જાતમન્ધસઃ ।
મદેષુ સર્વધા અસિ ॥ ૯.૦૧૮.૦૨
તવ વિશ્વે સજોષસો દેવાસઃ પીતિમાશત ।
મદેષુ સર્વધા અસિ ॥ ૯.૦૧૮.૦૩
આ યો વિશ્વાનિ વાર્યા વસૂનિ હસ્તયોર્દધે ।
મદેષુ સર્વધા અસિ ॥ ૯.૦૧૮.૦૪
ય ઇમે રોદસી મહી સં માતરેવ દોહતે ।
મદેષુ સર્વધા અસિ ॥ ૯.૦૧૮.૦૫
પરિ યો રોદસી ઉભે સદ્યો વાજેભિરર્ષતિ ।
મદેષુ સર્વધા અસિ ॥ ૯.૦૧૮.૦૬
સ શુષ્મી કલશેષ્વા પુનાનો અચિક્રદત્ ।
મદેષુ સર્વધા અસિ ॥ ૯.૦૧૮.૦૭
યત્સોમ ચિત્રમુક્થ્યં દિવ્યં પાર્થિવં વસુ ।
તન્નઃ પુનાન આ ભર ॥ ૯.૦૧૯.૦૧
યુવં હિ સ્થઃ સ્વર્પતી ઇન્દ્રશ્ચ સોમ ગોપતી ।
ઈશાના પિપ્યતં ધિયઃ ॥ ૯.૦૧૯.૦૨
વૃષા પુનાન આયુષુ સ્તનયન્નધિ બર્હિષિ ।
હરિઃ સન્યોનિમાસદત્ ॥ ૯.૦૧૯.૦૩
અવાવશન્ત ધીતયો વૃષભસ્યાધિ રેતસિ ।
સૂનોર્વત્સસ્ય માતરઃ ॥ ૯.૦૧૯.૦૪
કુવિદ્વૃષણ્યન્તીભ્યઃ પુનાનો ગર્ભમાદધત્ ।
યાઃ શુક્રં દુહતે પયઃ ॥ ૯.૦૧૯.૦૫

ઉપ શિક્ષાપતસ્થુષો ભિયસમા ધેહિ શત્રુષુ ।
પવમાન વિદા રયિમ્ ॥ ૯.૦૧૯.૦૬
નિ શત્રોઃ સોમ વૃષ્ણ્યં નિ શુષ્મં નિ વયસ્તિર ।
દૂરે વા સતો અન્તિ વા ॥ ૯.૦૧૯.૦૭
પ્ર કવિર્દેવવીતયેઽવ્યો વારેભિરર્ષતિ ।
સાહ્વાન્વિશ્વા અભિ સ્પૃધઃ ॥ ૯.૦૨૦.૦૧
સ હિ ષ્મા જરિતૃભ્ય આ વાજં ગોમન્તમિન્વતિ ।
પવમાનઃ સહસ્રિણમ્ ॥ ૯.૦૨૦.૦૨
પરિ વિશ્વાનિ ચેતસા મૃશસે પવસે મતી ।
સ નઃ સોમ શ્રવો વિદઃ ॥ ૯.૦૨૦.૦૩
અભ્યર્ષ બૃહદ્યશો મઘવદ્ભ્યો ધ્રુવં રયિમ્ ।
ઇષં સ્તોતૃભ્ય આ ભર ॥ ૯.૦૨૦.૦૪
ત્વં રાજેવ સુવ્રતો ગિરઃ સોમા વિવેશિથ ।
પુનાનો વહ્ને અદ્ભુત ॥ ૯.૦૨૦.૦૫
સ વહ્નિરપ્સુ દુષ્ટરો મૃજ્યમાનો ગભસ્ત્યોઃ ।
સોમશ્ચમૂષુ સીદતિ ॥ ૯.૦૨૦.૦૬
ક્રીળુર્મખો ન મંહયુઃ પવિત્રં સોમ ગચ્છસિ ।
દધત્સ્તોત્રે સુવીર્યમ્ ॥ ૯.૦૨૦.૦૭
એતે ધાવન્તીન્દવઃ સોમા ઇન્દ્રાય ઘૃષ્વયઃ ।
મત્સરાસઃ સ્વર્વિદઃ ॥ ૯.૦૨૧.૦૧
પ્રવૃણ્વન્તો અભિયુજઃ સુષ્વયે વરિવોવિદઃ ।
સ્વયં સ્તોત્રે વયસ્કૃતઃ ॥ ૯.૦૨૧.૦૨
વૃથા ક્રીળન્ત ઇન્દવઃ સધસ્થમભ્યેકમિત્ ।
સિન્ધોરૂર્મા વ્યક્ષરન્ ॥ ૯.૦૨૧.૦૩
એતે વિશ્વાનિ વાર્યા પવમાનાસ આશત ।
હિતા ન સપ્તયો રથે ॥ ૯.૦૨૧.૦૪
આસ્મિન્પિશઙ્ગમિન્દવો દધાતા વેનમાદિશે ।

યો અસ્મભ્યમરાવા ॥ ૯.૦૨૧.૦૫

ઋભુર્ન રથ્યં નવં દધાતા કેતમાદિશે ।

શુક્રાઃ પવધ્વમર્ણસા ॥ ૯.૦૨૧.૦૬

એત ઉ ત્યે અવીવશન્કાષ્ઠાં વાજિનો અક્રત ।

સતઃ પ્રાસાવિષુર્મતિમ્ ॥ ૯.૦૨૧.૦૭

એતે સોમાસ આશવો રથા ઇવ પ્ર વાજિનઃ ।

સર્ગાઃ સૃષ્ટા અહેષત ॥ ૯.૦૨૨.૦૧

એતે વાતા ઇવોરવઃ પર્જન્યસ્યેવ વૃષ્ટયઃ ।

અગ્નેરિવ ભ્રમા વૃથા ॥ ૯.૦૨૨.૦૨

એતે પૂતા વિપશ્ચિતઃ સોમાસો દધ્યાશિરઃ ।

વિપા વ્યાનશુર્ધિયઃ ॥ ૯.૦૨૨.૦૩

એતે મૃષ્ટા અમર્ત્યાઃ સસૃવાંસો ન શશ્રમુઃ ।

ઇયક્ષન્તઃ પથો રજઃ ॥ ૯.૦૨૨.૦૪

એતે પૃષ્ઠાનિ રોદસોર્વિપ્રયન્તો વ્યાનશુઃ ।

ઉતેદમુત્તમં રજઃ ॥ ૯.૦૨૨.૦૫

તન્તું તન્વાનમુત્તમમનુ પ્રવત આશત ।

ઉતેદમુત્તમાય્યમ્ ॥ ૯.૦૨૨.૦૬

ત્વં સોમ પણિભ્ય આ વસુ ગવ્યાનિ ધારયઃ ।

તતં તન્તુમચિક્રદઃ ॥ ૯.૦૨૨.૦૭

સોમા અસૃગ્રમાશવો મધોર્મદસ્ય ધારયા ।

અભિ વિશ્વાનિ કાવ્યા ॥ ૯.૦૨૩.૦૧

અનુ પ્રત્નાસ આયવઃ પદં નવીયો અક્રમુઃ ।

રુચે જનન્ત સૂર્યમ્ ॥ ૯.૦૨૩.૦૨

આ પવમાન નો ભરાર્યો અદાશુષો ગયમ્ ।

કૃધિ પ્રજાવતીરિષઃ ॥ ૯.૦૨૩.૦૩

અભિ સોમાસ આયવઃ પવન્તે મદ્યં મદમ્ ।

અભિ કોશં મધુશ્ચુતમ્ ॥ ૯.૦૨૩.૦૪

સોમો અર્ષતિ ધર્ણસિર્દધાન ઇન્દ્રિયં રસમ્ ।
સુવીરો અભિશસ્તિપાઃ ॥ ૯.૦૨૩.૦૫
ઇન્દ્રાય સોમ પવસે દેવેભ્યઃ સધમાદ્યઃ ।
ઇન્દો વાજં સિષાસસિ ॥ ૯.૦૨૩.૦૬
અસ્ય પીત્વા મદાનામિન્દ્રો વૃત્રાણ્યપ્રતિ ।
જઘાન જઘનચ્ચ નુ ॥ ૯.૦૨૩.૦૭
પ્ર સોમાસો અધન્વિષુઃ પવમાનાસ ઇન્દવઃ ।
શ્રીણાના અપ્સુ મૃઞ્જત ॥ ૯.૦૨૪.૦૧
અભિ ગાવો અધન્વિષુરાપો ન પ્રવતા યતીઃ ।
પુનાના ઇન્દ્રમાશત ॥ ૯.૦૨૪.૦૨
પ્ર પવમાન ધન્વસિ સોમેન્દ્રાય પાતવે ।
નૃભિર્યતો વિ નીયસે ॥ ૯.૦૨૪.૦૩
ત્વં સોમ નૃમાદનઃ પવસ્વ ચર્ષણીસહે ।
સસ્નિર્યો અનુમાદ્યઃ ॥ ૯.૦૨૪.૦૪
ઇન્દો યદદ્રિભિઃ સુતઃ પવિત્રં પરિધાવસિ ।
અરમિન્દ્રસ્ય ધામ્ને ॥ ૯.૦૨૪.૦૫
પવસ્વ વૃત્રહન્તમોક્થેભિરનુમાદ્યઃ ।
શુચિઃ પાવકો અદ્ભુતઃ ॥ ૯.૦૨૪.૦૬
શુચિઃ પાવક ઉચ્યતે સોમઃ સુતસ્ય મધ્વઃ ।
દેવાવીરઘશંસહા ॥ ૯.૦૨૪.૦૭
પવસ્વ દક્ષસાધનો દેવેભ્યઃ પીતયે હરે ।
મરુદ્ભ્યો વાયવે મદઃ ॥ ૯.૦૨૫.૦૧
પવમાન ધિયા હિતોઽભિ યોનિં કનિક્રદત્ ।
ધર્મણા વાયુમા વિશ ॥ ૯.૦૨૫.૦૨
સં દેવૈઃ શોભતે વૃષા કવિર્યોનાવધિ પ્રિયઃ ।
વૃત્રહા દેવવીતમઃ ॥ ૯.૦૨૫.૦૩
વિશ્વા રૂપાણ્યાવિશન્પુનાનો યાતિ હર્યતઃ ।

યત્રામૃતાસ આસતે ॥ ૯.૦૨૫.૦૪

અરુષો જનયન્ગિરઃ સોમઃ પવત આયુષક્ ।

ઇન્દ્રં ગચ્છન્કવિક્રતુઃ ॥ ૯.૦૨૫.૦૫

આ પવસ્વ મદિન્તમ પવિત્રં ધારયા કવે ।

અર્કસ્ય યોનિમાસદમ્ ॥ ૯.૦૨૫.૦૬

તમમૃક્ષન્ત વાજિનમુપસ્થે અદિતેરધિ ।

વિપ્રાસો અણ્વ્યા ધિયા ॥ ૯.૦૨૬.૦૧

તં ગાવો અભ્યનૂષત સહસ્રધારમક્ષિતમ્ ।

ઇન્દું ધર્તારમા દિવઃ ॥ ૯.૦૨૬.૦૨

તં વેધાં મેધયાહ્યન્પવમાનમધિ દ્યવિ ।

ધર્ણસિં ભૂરિધાયસમ્ ॥ ૯.૦૨૬.૦૩

તમહ્યન્ભુરિજોર્ધિયા સંવસાનં વિવસ્વતઃ ।

પતિં વાચો અદાભ્યમ્ ॥ ૯.૦૨૬.૦૪

તં સાનાવધિ જામયો હરિં હિન્વન્ત્યદ્રિભિઃ ।

હર્યતં ભૂરિચક્ષસમ્ ॥ ૯.૦૨૬.૦૫

તં ત્વા હિન્વન્તિ વેધસઃ પવમાન ગિરાવૃધમ્ ।

ઇન્દવિન્દ્રાય મત્સરમ્ ॥ ૯.૦૨૬.૦૬

એષ કવિરભિષ્ટુતઃ પવિત્રે અધિ તોશતે ।

પુનાનો ઘ્નન્નપ સ્રિધઃ ॥ ૯.૦૨૭.૦૧

એષ ઇન્દ્રાય વાયવે સ્વર્જિત્પરિ ષિચ્યતે ।

પવિત્રે દક્ષસાધનઃ ॥ ૯.૦૨૭.૦૨

એષ નૃભિર્વિ નીયતે દિવો મૂર્ધા વૃષા સુતઃ ।

સોમો વનેષુ વિશ્વવિત્ ॥ ૯.૦૨૭.૦૩

એષ ગવ્યુરચિક્રદત્પવમાનો હિરણ્યયુઃ ।

ઇન્દુઃ સત્રાજિદસ્તૃતઃ ॥ ૯.૦૨૭.૦૪

એષ સૂર્યેણ હાસતે પવમાનો અધિ દ્યવિ ।

પવિત્રે મત્સરો મદઃ ॥ ૯.૦૨૭.૦૫

એષ શુષ્મ્યસિષ્યદદન્તરિક્ષે વૃષા હરિઃ ।
પુનાન ઇન્દુરિન્દ્રમા ॥ ૯.૦૨૭.૦૬
એષ વાજી હિતો નૃભિર્વિશ્વવિન્મનસસ્પતિઃ ।
અવ્યો વારં વિ ધાવતિ ॥ ૯.૦૨૮.૦૧
એષ પવિત્રે અક્ષરત્સોમો દેવેભ્યઃ સુતઃ ।
વિશ્વા ધામાન્યાવિશન્ ॥ ૯.૦૨૮.૦૨
એષ દેવઃ શુભાયતેઽધિ યોનાવમર્ત્યઃ ।
વૃત્રહા દેવવીતમઃ ॥ ૯.૦૨૮.૦૩
એષ વૃષા કનિક્રદદ્દશભિર્જામિભિર્યતઃ ।
અભિ દ્રોણાનિ ધાવતિ ॥ ૯.૦૨૮.૦૪
એષ સૂર્યમરોચયત્પવમાનો વિચર્ષણિઃ ।
વિશ્વા ધામાનિ વિશ્વવિત્ ॥ ૯.૦૨૮.૦૫
એષ શુષ્મ્યદાભ્યઃ સોમઃ પુનાનો અર્ષતિ ।
દેવાવીરઘશંસહા ॥ ૯.૦૨૮.૦૬
પ્રાસ્ય ધારા અક્ષરન્વૃષ્ણઃ સુતસ્યૌજસા ।
દેવાઁ અનુ પ્રભૂષતઃ ॥ ૯.૦૨૯.૦૧
સપ્તિં મૃજન્તિ વેધસો ગૃણન્તઃ કારવો ગિરા ।
જ્યોતિર્જજ્ઞાનમુક્થ્યમ્ ॥ ૯.૦૨૯.૦૨
સુષહા સોમ તાનિ તે પુનાનાય પ્રભૂવસો ।
વર્ધા સમુદ્રમુક્થ્યમ્ ॥ ૯.૦૨૯.૦૩
વિશ્વા વસૂનિ સંજયન્પવસ્વ સોમ ધારયા ।
ઇનુ દ્વેષાંસિ સધ્ર્યક્ ॥ ૯.૦૨૯.૦૪
રક્ષા સુ નો અરરુષઃ સ્વનાત્સમસ્ય કસ્ય ચિત્ ।
નિદો યત્ર મુમુચ્મહે ॥ ૯.૦૨૯.૦૫
એન્દો પાર્થિવં રયિં દિવ્યં પવસ્વ ધારયા ।
દ્યુમન્તં શુષ્મમા ભર ॥ ૯.૦૨૯.૦૬
પ્ર ધારા અસ્ય શુષ્મિણો વૃથા પવિત્રે અક્ષરન્ ।

પુનાનો વાચમિષ્યતિ ॥ ૯.૦૩૦.૦૧

ઇન્દુર્હિયાનઃ સોતૃભિર્મૃજ્યમાનઃ કનિક્રદત્ ।

ઇયર્તિ વગ્નુમિન્દ્રિયમ્ ॥ ૯.૦૩૦.૦૨

આ નઃ શુષ્મં નૃષાહ્યં વીરવન્તં પુરુસ્પૃહમ્ ।

પવસ્વ સોમ ધારયા ॥ ૯.૦૩૦.૦૩

પ્ર સોમો અતિ ધારયા પવમાનો અસિષ્યદત્ ।

અભિ દ્રોણાન્યાસદમ્ ॥ ૯.૦૩૦.૦૪

અપ્સુ ત્વા મધુમત્તમં હરિં હિન્વન્ત્યદ્રિભિઃ ।

ઇન્દવિન્દ્રાય પીતયે ॥ ૯.૦૩૦.૦૫

સુનોતા મધુમત્તમં સોમમિન્દ્રાય વજ્રિણે ।

ચારું શર્ધાય મત્સરમ્ ॥ ૯.૦૩૦.૦૬

પ્ર સોમાસઃ સ્વાધ્ય૧ઃ પવમાનાસો અક્રમુઃ ।

રયિં કૃણ્વન્તિ ચેતનમ્ ॥ ૯.૦૩૧.૦૧

દિવસ્પૃથિવ્યા અધિ ભવેન્દો દ્યુમ્નવર્ધનઃ ।

ભવા વાજાનાં પતિઃ ॥ ૯.૦૩૧.૦૨

તુભ્યં વાતા અભિપ્રિયસ્તુભ્યમર્ષન્તિ સિન્ધવઃ ।

સોમ વર્ધન્તિ તે મહઃ ॥ ૯.૦૩૧.૦૩

આ પ્યાયસ્વ સમેતુ તે વિશ્વતઃ સોમ વૃષ્ણ્યમ્ ।

ભવા વાજસ્ય સંગથે ॥ ૯.૦૩૧.૦૪

તુભ્યં ગાવો ઘૃતં પયો બભ્રો દુદુહ્રે અક્ષિતમ્ ।

વર્ષિષ્ઠે અધિ સાનવિ ॥ ૯.૦૩૧.૦૫

સ્વાયુધસ્ય તે સતો ભુવનસ્ય પતે વયમ્ ।

ઇન્દો સખિત્વમુશ્મસિ ॥ ૯.૦૩૧.૦૬

પ્ર સોમાસો મદચ્યુતઃ શ્રવસે નો મઘોનઃ ।

સુતા વિદથે અક્રમુઃ ॥ ૯.૦૩૨.૦૧

આદીં ત્રિતસ્ય યોષણો હરિં હિન્વન્ત્યદ્રિભિઃ ।

ઇન્દુમિન્દ્રાય પીતયે ॥ ૯.૦૩૨.૦૨

આદીં હંસો યથા ગણં વિશ્વસ્યાવીવશન્મતિમ્ ।
અત્યો ન ગોભિરજ્યતે ॥ ૯.૦૩૨.૦૩
ઉભે સોમાવચાકશન્મૃગો ન તક્તો અર્ષસિ ।
સીદન્નૃતસ્ય યોનિમા ॥ ૯.૦૩૨.૦૪
અભિ ગાવો અનૂષત યોષા જારમિવ પ્રિયમ્ ।
અગન્નાજિં યથા હિતમ્ ॥ ૯.૦૩૨.૦૫
અસ્મે ધેહિ દ્યુમદ્યશો મઘવદ્ભ્યશ્ચ મહ્યં ચ ।
સનિં મેધામુત શ્રવઃ ॥ ૯.૦૩૨.૦૬
પ્ર સોમાસો વિપશ્ચિતોઽપાં ન યન્ત્યૂર્મયઃ ।
વનાનિ મહિષા ઇવ ॥ ૯.૦૩૩.૦૧
અભિ દ્રોણાનિ બભ્રવઃ શુક્રા ઋતસ્ય ધારયા ।
વાજં ગોમન્તમક્ષરન્ ॥ ૯.૦૩૩.૦૨
સુતા ઇન્દ્રાય વાયવે વરુણાય મરુદ્ભ્યઃ ।
સોમા અર્ષન્તિ વિષ્ણવે ॥ ૯.૦૩૩.૦૩
તિસ્રો વાચ ઉદીરતે ગાવો મિમન્તિ ધેનવઃ ।
હરિરેતિ કનિક્રદત્ ॥ ૯.૦૩૩.૦૪
અભિ બ્રહ્મીરનૂષત યહ્વીરૃતસ્ય માતરઃ ।
મર્મૃજ્યન્તે દિવઃ શિશુમ્ ॥ ૯.૦૩૩.૦૫
રાયઃ સમુદ્રાઁશ્ચતુરોઽસ્મભ્યં સોમ વિશ્વતઃ ।
આ પવસ્વ સહસ્રિણઃ ॥ ૯.૦૩૩.૦૬
પ્ર સુવાનો ધારયા તનેન્દુર્હિન્વાનો અર્ષતિ ।
રુજદ્દૃળ્હા વ્યોજસા ॥ ૯.૦૩૪.૦૧
સુત ઇન્દ્રાય વાયવે વરુણાય મરુદ્ભ્યઃ ।
સોમો અર્ષતિ વિષ્ણવે ॥ ૯.૦૩૪.૦૨
વૃષાણં વૃષભિર્યતં સુન્વન્તિ સોમમદ્રિભિઃ ।
દુહન્તિ શક્મના પયઃ ॥ ૯.૦૩૪.૦૩
ભુવત્ત્રિતસ્ય મર્જ્યો ભુવદિન્દ્રાય મત્સરઃ ।

સં રૂપૈરજ્યતે હરિઃ ॥ ૯.૦૩૪.૦૪

અભીમૃતસ્ય વિષ્ટપં દુહતે પૃશ્નિમાતરઃ ।
ચારુ પ્રિયતમં હવિઃ ॥ ૯.૦૩૪.૦૫

સમેનમહ્રુતા ઇમા ગિરો અર્ષન્તિ સસ્રુતઃ ।
ધેનૂર્વાશ્રો અવીવશત્ ॥ ૯.૦૩૪.૦૬

આ નઃ પવસ્વ ધારયા પવમાન રયિં પૃથુમ્ ।
યયા જ્યોતિર્વિદાસિ નઃ ॥ ૯.૦૩૫.૦૧

ઇન્દો સમુદ્રમીઙ્ખય પવસ્વ વિશ્વમેજય ।
રાયો ધર્તા ન ઓજસા ॥ ૯.૦૩૫.૦૨

ત્વયા વીરેણ વીરવોઽભિ ષ્યામ પૃતન્યતઃ ।
ક્ષરા ણો અભિ વાર્યમ્ ॥ ૯.૦૩૫.૦૩

પ્ર વાજમિન્દુરિષ્યતિ સિષાસન્વાજસા ઋષિઃ ।
વ્રતા વિદાન આયુધા ॥ ૯.૦૩૫.૦૪

તં ગીર્ભિર્વાચમીઙ્ખયં પુનાનં વાસયામસિ ।
સોમં જનસ્ય ગોપતિમ્ ॥ ૯.૦૩૫.૦૫

વિશ્વો યસ્ય વ્રતે જનો દાધાર ધર્મણસ્પતેઃ ।
પુનાનસ્ય પ્રભૂવસોઃ ॥ ૯.૦૩૫.૦૬

અસર્જિ રથ્યો યથા પવિત્રે ચમ્વોઃ સુતઃ ।
કાર્ષ્મન્વાજી ન્યક્રમીત્ ॥ ૯.૦૩૬.૦૧

સ વહ્નિઃ સોમ જાગૃવિઃ પવસ્વ દેવવીરતિ ।
અભિ કોશં મધુશ્ચુતમ્ ॥ ૯.૦૩૬.૦૨

સ નો જ્યોતીંષિ પૂર્વ્ય પવમાન વિ રોચય ।
ક્રત્વે દક્ષાય નો હિનુ ॥ ૯.૦૩૬.૦૩

શુમ્ભમાન ઋતાયુભિર્મૃજ્યમાનો ગભસ્ત્યોઃ ।
પવતે વારે અવ્યયે ॥ ૯.૦૩૬.૦૪

સ વિશ્વા દાશુષે વસુ સોમો દિવ્યાનિ પાર્થિવા ।
પવતામાન્તરિક્ષ્યા ॥ ૯.૦૩૬.૦૫

આ દિવસ્પૃષ્ઠમશ્વયુર્ગવ્યયુઃ સોમ રોહસિ ।
વીરયુઃ શવસસ્પતે ॥ ૯.૦૩૬.૦૬

સ સુતઃ પીતયે વૃષા સોમઃ પવિત્રે અર્ષતિ ।
વિઘ્નન્રક્ષાંસિ દેવયુઃ ॥ ૯.૦૩૭.૦૧
સ પવિત્રે વિચક્ષણો હરિરર્ષતિ ધર્ણસિઃ ।
અભિ યોનિં કનિક્રદત્ ॥ ૯.૦૩૭.૦૨
સ વાજી રોચના દિવઃ પવમાનો વિ ધાવતિ ।
રક્ષોહા વારમવ્યયમ્ ॥ ૯.૦૩૭.૦૩
સ ત્રિતસ્યાધિ સાનવિ પવમાનો અરોચયત્ ।
જામિભિઃ સૂર્યં સહ ॥ ૯.૦૩૭.૦૪
સ વૃત્રહા વૃષા સુતો વરિવોવિદદાભ્યઃ ।
સોમો વાજમિવાસરત્ ॥ ૯.૦૩૭.૦૫
સ દેવઃ કવિનેષિતોઽભિ દ્રોણાનિ ધાવતિ ।
ઇન્દુરિન્દ્રાય મંહના ॥ ૯.૦૩૭.૦૬

એષ ઉ સ્ય વૃષા રથોઽવ્યો વારેભિરર્ષતિ ।
ગચ્છન્વાજં સહસ્રિણમ્ ॥ ૯.૦૩૮.૦૧
એતં ત્રિતસ્ય યોષણો હરિં હિન્વન્ત્યદ્રિભિઃ ।
ઇન્દુમિન્દ્રાય પીતયે ॥ ૯.૦૩૮.૦૨
એતં ત્યં હરિતો દશ મર્મૃજ્યન્તે અપસ્યુવઃ ।
યાભિર્મદાય શુમ્ભતે ॥ ૯.૦૩૮.૦૩
એષ સ્ય માનુષીષ્વા શ્યેનો ન વિક્ષુ સીદતિ ।
ગચ્છઞ્જારો ન યોષિતમ્ ॥ ૯.૦૩૮.૦૪
એષ સ્ય મદ્યો રસોઽવ ચષ્ટે દિવઃ શિશુઃ ।
ય ઇન્દુર્વારમાવિશત્ ॥ ૯.૦૩૮.૦૫
એષ સ્ય પીતયે સુતો હરિરર્ષતિ ધર્ણસિઃ ।
ક્રન્દન્યોનિમભિ પ્રિયમ્ ॥ ૯.૦૩૮.૦૬

આશુરર્ષ બૃહન્મતે પરિ પ્રિયેણ ધામ્ના ।

યત્ર દેવા ઇતિ બ્રવન્ ॥ ૯.૦૩૯.૦૧
પરિષ્કૃણ્વન્નનિષ્કૃતં જનાય યાતયન્નિષઃ ।
વૃષ્ટિં દિવઃ પરિ સ્રવ ॥ ૯.૦૩૯.૦૨
સુત એતિ પવિત્ર આ ત્વિષિં દધાન ઓજસા ।
વિચક્ષાણો વિરોચયન્ ॥ ૯.૦૩૯.૦૩
અયં સ યો દિવસ્પરિ રઘુયામા પવિત્ર આ ।
સિન્ધોરૂર્મા વ્યક્ષરત્ ॥ ૯.૦૩૯.૦૪
આવિવાસન્પરાવતો અથો અર્વાવતઃ સુતઃ ।
ઇન્દ્રાય સિચ્યતે મધુ ॥ ૯.૦૩૯.૦૫
સમીચીના અનૂષત હરિં હિન્વન્ત્યદ્રિભિઃ ।
યોનાવૃતસ્ય સીદત ॥ ૯.૦૩૯.૦૬

પુનાનો અક્રમીદભિ વિશ્વા મૃધો વિચર્ષણિઃ ।
શુમ્ભન્તિ વિપ્રં ધીતિભિઃ ॥ ૯.૦૪૦.૦૧
આ યોનિમરુણો રુહદ્ગમદિન્દ્રં વૃષા સુતઃ ।
ધ્રુવે સદસિ સીદતિ ॥ ૯.૦૪૦.૦૨
નૂ નો રયિં મહામિન્દોઽસ્મભ્યં સોમ વિશ્વતઃ ।
આ પવસ્વ સહસ્રિણમ્ ॥ ૯.૦૪૦.૦૩
વિશ્વા સોમ પવમાન દ્યુમ્નાનીન્દવા ભર ।
વિદાઃ સહસ્રિણીરિષઃ ॥ ૯.૦૪૦.૦૪
સ નઃ પુનાન આ ભર રયિં સ્તોત્રે સુવીર્યમ્ ।
જરિતુર્વર્ધયા ગિરઃ ॥ ૯.૦૪૦.૦૫
પુનાન ઇન્દવા ભર સોમ દ્વિબર્હસં રયિમ્ ।
વૃષન્નિન્દો ન ઉક્થ્યમ્ ॥ ૯.૦૪૦.૦૬

પ્ર યે ગાવો ન ભૂર્ણયસ્ત્વેષા અયાસો અક્રમુઃ ।
ઘ્નન્તઃ કૃષ્ણામપ ત્વચમ્ ॥ ૯.૦૪૧.૦૧
સુવિતસ્ય મનામહેઽતિ સેતું દુરાવ્યમ્ ।
સાહ્વાંસો દસ્યુમવ્રતમ્ ॥ ૯.૦૪૧.૦૨

શૃ॒ણ્વે વૃ॒ષ્ટેરિ॑વ સ્વ॒નઃ પવ॑માનસ્ય શુ॒ષ્મિણઃ॑ ।
ચર॑ન્તિ વિ॒દ્યુતો॑ દિ॒વિ ॥ ૯.૦૪૧.૦૩
આ પ॑વસ્વ મ॒હીમિ॒ષં ગોમ॑દિન્દો॒ હિર॑ણ્યવત્ ।
અશ્વા॑વ॒દ્વાજ॑વત્સુ॒તઃ ॥ ૯.૦૪૧.૦૪
સ પ॑વસ્વ વિચર્ષ॒ણ આ મ॒હી રોદ॑સી પૃણ ।
ઉ॒ષાઃ સૂર્યો॒ ન ર॒શ્મિભિઃ॑ ॥ ૯.૦૪૧.૦૫
પ॒રિ॑ ણઃ શર્મ॒યન્ત્યા ધાર॑યા સોમ વિ॒શ્વતઃ॑ ।
સરા॑ ર॒સેવ॑ વિ॒ષ્ટપ॑મ્ ॥ ૯.૦૪૧.૦૬
જ॒ન॑યન્રોચ॒ના દિ॒વો જ॒ન॑ય॒ન્નપ્સુ સૂર્ય॑મ્ ।
વસા॑નો॒ ગા અ॒પો હરિઃ॑ ॥ ૯.૦૪૨.૦૧
એ॒ષ પ્ર॒ત્નેન॒ મન્મ॑ના દે॒વો દે॒વેભ્ય॒સ્પરિ॑ ।
ધા॒ર॑યા પવતે સુ॒તઃ ॥ ૯.૦૪૨.૦૨
વા॒વૃ॒ધા॒નાય॒ તૂર્વ॑યે॒ પવ॑ન્તે॒ વાજ॑સાતયે ।
સોમાઃ॑ સ॒હસ્ર॑પાજસઃ ॥ ૯.૦૪૨.૦૩
દુ॒હા॒નઃ પ્ર॒ત્નમિત્પયઃ॑ પ॒વિ॒ત્રે॒ પરિ॑ ષિચ્યતે ।
ક્ર॑ન્દન્દે॒વાઁ અ॑જીજનત્ ॥ ૯.૦૪૨.૦૪
અ॒ભિ વિ॒શ્વા॑નિ॒ વાર્યા॒ભિ દે॒વાઁ ઋ॑તા॒વૃધઃ॑ ।
સો॒મઃ॑ પુ॒ના॒નો અ॑ર્ષતિ ॥ ૯.૦૪૨.૦૫
ગોમ॑ન્નઃ સોમ વી॒રવ॒દશ્વા॑વ॒દ્વાજ॑વત્સુ॒તઃ ।
પ॑વસ્વ બૃ॒હતી॑રિષઃ ॥ ૯.૦૪૨.૦૬

યો અત્ય॑ ઇવ મૃ॒જ્યતે॒ ગોભિ॒ર્મદા॑ય હ॒ર્યતઃ ।
તં ગી॒ર્ભિર્વા॑સયામસિ ॥ ૯.૦૪૩.૦૧
તં નો॒ વિશ્વા॑ અવ॒સ્યુવો॒ ગિરઃ॑ શુમ્ભન્તિ પૂ॒ર્વથા॑ ।
ઇ॒ન્દુ॑મિન્દ્રા॑ય પી॒તયે॑ ॥ ૯.૦૪૩.૦૨
પુ॒ના॒નો યા॑તિ હ॒ર્યતઃ સોમો॑ ગી॒ર્ભિઃ પરિ॑ષ્કૃતઃ ।
વિપ્ર॑સ્ય॒ મેધ્યા॑તિથેઃ ॥ ૯.૦૪૩.૦૩
પ॑વમાન વિ॒દા ર॒યિમ॒સ્મભ્યં॑ સોમ સુ॒શ્રિય॑મ્ ।

ઇન્દો સહસ્રવર્ચસમ્ ॥ ૯.૦૪૩.૦૪
ઇન્દુરત્યો ન વાજસૃત્કનિક્રન્તિ પવિત્ર આ ।
યદક્ષારતિ દેવયુઃ ॥ ૯.૦૪૩.૦૫
પવસ્વ વાજસાતયે વિપ્રસ્ય ગૃણતો વૃધે ।
સોમ રાસ્વ સુવીર્યમ્ ॥ ૯.૦૪૩.૦૬
પ્ર ણ ઇન્દો મહે તન ઊર્મિં ન બિભ્રદર્ષસિ ।
અભિ દેવાઁ અયાસ્યઃ ॥ ૯.૦૪૪.૦૧
મતી જુષ્ટો ધિયા હિતઃ સોમો હિન્વે પરાવતિ ।
વિપ્રસ્ય ધારયા કવિઃ ॥ ૯.૦૪૪.૦૨
અયં દેવેષુ જાગૃવિઃ સુત એતિ પવિત્ર આ ।
સોમો યાતિ વિચર્ષણિઃ ॥ ૯.૦૪૪.૦૩
સ નઃ પવસ્વ વાજયુશ્ચક્રાણશ્ચારુમધ્વરમ્ ।
બર્હિષ્માઁ આ વિવાસતિ ॥ ૯.૦૪૪.૦૪
સ નો ભગાય વાયવે વિપ્રવીરઃ સદાવૃધઃ ।
સોમો દેવેષ્વા યમત્ ॥ ૯.૦૪૪.૦૫
સ નો અદ્ય વસુત્તયે ક્રતુવિદ્ગાતુવિત્તમઃ ।
વાજં જેષિ શ્રવો બૃહત્ ॥ ૯.૦૪૪.૦૬
સ પવસ્વ મદાય કં નૃચક્ષા દેવવીતયે ।
ઇન્દવિન્દ્રાય પીતયે ॥ ૯.૦૪૫.૦૧
સ નો અર્ષાભિ દૂત્યં૧ ત્વમિન્દ્રાય તોશસે ।
દેવાન્સખિભ્ય આ વરમ્ ॥ ૯.૦૪૫.૦૨
ઉત ત્વામરુણં વયં ગોભિરઞ્જ્મો મદાય કમ્ ।
વિ નો રાયે દુરો વૃધિ ॥ ૯.૦૪૫.૦૩
અત્યૂ પવિત્રમક્રમીદ્વાજી ધુરં ન યામનિ ।
ઇન્દુર્દેવેષુ પત્યતે ॥ ૯.૦૪૫.૦૪
સમી સખાયો અસ્વરન્વને ક્રીળન્તમત્યવિમ્ ।
ઇન્દું નાવા અનૂષત ॥ ૯.૦૪૫.૦૫

તયા પવસ્વ ધારયા યયા પીતો વિચક્ષસે ।
ઇન્દો સ્તોત્રે સુવીર્યમ્ ॥ ૯.૦૪૫.૦૬
અસૃગ્રન્દેવવીતયેઽત્યાસઃ કૃત્વ્યા ઇવ ।
ક્ષરન્તઃ પર્વતાવૃધઃ ॥ ૯.૦૪૬.૦૧
પરિષ્કૃતાસ ઇન્દવો યોષેવ પિત્ર્યાવતી ।
વાયું સોમા અસૃક્ષત ॥ ૯.૦૪૬.૦૨
એતે સોમાસ ઇન્દવઃ પ્રયસ્વન્તશ્ચમૂ સુતાઃ ।
ઇન્દ્રં વર્ધન્તિ કર્મભિઃ ॥ ૯.૦૪૬.૦૩
આ ધાવતા સુહસ્ત્યઃ શુક્રા ગૃભ્ણીત મન્થિના ।
ગોભિઃ શ્રીણીત મત્સરમ્ ॥ ૯.૦૪૬.૦૪
સ પવસ્વ ધનંજય પ્રયન્તા રાધસો મહઃ ।
અસ્મભ્યં સોમ ગાતુવિત્ ॥ ૯.૦૪૬.૦૫
એતં મૃજન્તિ મર્જ્યં પવમાનં દશ ક્ષિપઃ ।
ઇન્દ્રાય મત્સરં મદમ્ ॥ ૯.૦૪૬.૦૬
અયા સોમઃ સુકૃત્યયા મહશ્ચિદભ્યવર્ધત ।
મન્દાન ઉદ્વૃષાયતે ॥ ૯.૦૪૭.૦૧
કૃતાનીદસ્ય કર્ત્વા ચેતન્તે દસ્યુતર્હણા ।
ઋણા ચ ધૃષ્ણુશ્ચયતે ॥ ૯.૦૪૭.૦૨
આત્સોમ ઇન્દ્રિયો રસો વજ્રઃ સહસ્રસા ભુવત્ ।
ઉક્થં યદસ્ય જાયતે ॥ ૯.૦૪૭.૦૩
સ્વયં કવિર્વિધર્તરિ વિપ્રાય રત્નમિચ્છતિ ।
યદી મર્મૃજ્યતે ધિયઃ ॥ ૯.૦૪૭.૦૪
સિષાસતૂ રયીણાં વાજેષ્વર્વતામિવ ।
ભરેષુ જિગ્યુષામસિ ॥ ૯.૦૪૭.૦૫
તં ત્વા નૃમ્ણાનિ બિભ્રતં સધસ્થેષુ મહો દિવઃ ।
ચારું સુકૃત્યયેમહે ॥ ૯.૦૪૮.૦૧
સંવૃક્તધૃષ્ણુમુક્થ્યં મહામહિવ્રતં મદમ્ ।

શતં પુરો રુરુક્ષણિમ્ ॥ ૯.૦૪૮.૦૨
અતસ્ત્વા રયિમભિ રાજાનં સુક્રતો દિવઃ ।
સુપર્ણો અવ્યથિર્ભરત્ ॥ ૯.૦૪૮.૦૩
વિશ્વસ્મા ઇત્સ્વર્દૃશે સાધારણં રજસ્તુરમ્ ।
ગોપામૃતસ્ય વિર્ભરત્ ॥ ૯.૦૪૮.૦૪
અધા હિન્વાન ઇન્દ્રિયં જ્યાયો મહિત્વમાનશે ।
અભિષ્ટિકૃદ્વિચર્ષણિઃ ॥ ૯.૦૪૮.૦૫
પવસ્વ વૃષ્ટિમા સુ નોઽપામૂર્મિં દિવસ્પરિ ।
અયક્ષ્મા બૃહતીરિષઃ ॥ ૯.૦૪૯.૦૧
તયા પવસ્વ ધારયા યયા ગાવ ઇહાગમન્ ।
જન્યાસ ઉપ નો ગૃહમ્ ॥ ૯.૦૪૯.૦૨
ઘૃતં પવસ્વ ધારયા યજ્ઞેષુ દેવવીતમઃ ।
અસ્મભ્યં વૃષ્ટિમા પવ ॥ ૯.૦૪૯.૦૩
સ ન ઊર્જે વ્યવ્યયં પવિત્રં ધાવ ધારયા ।
દેવાસઃ શૃણવન્હિ કમ્ ॥ ૯.૦૪૯.૦૪
પવમાનો અસિષ્યદદ્રક્ષાંસ્યપજઙ્ઘનત્ ।
પ્રત્નવદ્રોચયન્રુચઃ ॥ ૯.૦૪૯.૦૫
ઉત્તે શુષ્માસ ઈરતે સિન્ધોરૂર્મેરિવ સ્વનઃ ।
વાણસ્ય ચોદયા પવિમ્ ॥ ૯.૦૫૦.૦૧
પ્રસવે ત ઉદીરતે તિસ્રો વાચો મખસ્યુવઃ ।
યદવ્ય એષિ સાનવિ ॥ ૯.૦૫૦.૦૨
અવ્યો વારે પરિ પ્રિયં હરિં હિન્વન્ત્યદ્રિભિઃ ।
પવમાનં મધુશ્ચુતમ્ ॥ ૯.૦૫૦.૦૩
આ પવસ્વ મદિન્તમ પવિત્રં ધારયા કવે ।
અર્કસ્ય યોનિમાસદમ્ ॥ ૯.૦૫૦.૦૪
સ પવસ્વ મદિન્તમ ગોભિરઞ્જાનો અક્તુભિઃ ।
ઇન્દવિન્દ્રાય પીતયે ॥ ૯.૦૫૦.૦૫

અધ્વર્યો અદ્રિભિઃ સુતં સોમં પવિત્ર આ સૃજ ।
પુનીહીન્દ્રાય પાતવે ॥ ૯.૦૫૧.૦૧
દિવઃ પીયૂષમુત્તમં સોમમિન્દ્રાય વજ્રિણે ।
સુનોતા મધુમત્તમમ્ ॥ ૯.૦૫૧.૦૨
તવ ત્ય ઇન્દો અન્ધસો દેવા મધોર્વ્યશ્નતે ।
પવમાનસ્ય મરુતઃ ॥ ૯.૦૫૧.૦૩
ત્વં હિ સોમ વર્ધયન્સુતો મદાય ભૂર્ણયે ।
વૃષન્સ્તોતારમૂતયે ॥ ૯.૦૫૧.૦૪
અભ્યર્ષ વિચક્ષણ પવિત્રં ધારયા સુતઃ ।
અભિ વાજમુત શ્રવઃ ॥ ૯.૦૫૧.૦૫
પરિ દ્યુક્ષઃ સનદ્રયિર્ભરદ્વાજં નો અન્ધસા ।
સુવાનો અર્ષ પવિત્ર આ ॥ ૯.૦૫૨.૦૧
તવ પ્રત્નેભિરધ્વભિરવ્યો વારે પરિ પ્રિયઃ ।
સહસ્રધારો યાત્તના ॥ ૯.૦૫૨.૦૨
ચરુર્ન યસ્તમીઙ્ખયેન્દો ન દાનમીઙ્ખય ।
વધૈર્વધસ્નવીઙ્ખય ॥ ૯.૦૫૨.૦૩
નિ શુષ્મમિન્દવેષાં પુરુહૂત જનાનામ્ ।
યો અસ્માઁ આદિદેશતિ ॥ ૯.૦૫૨.૦૪
શતં ન ઇન્દ ઊતિભિઃ સહસ્રં વા શુચીનામ્ ।
પવસ્વ મંહયદ્રયિઃ ॥ ૯.૦૫૨.૦૫
ઉત્તે શુષ્માસો અસ્થૂ રક્ષો ભિન્દન્તો અદ્રિવઃ ।
નુદસ્વ યાઃ પરિસ્પૃધઃ ॥ ૯.૦૫૩.૦૧
અયા નિજઘ્નિરોજસા રથસંગે ધને હિતે ।
સ્તવા અબિભ્યુષા હૃદા ॥ ૯.૦૫૩.૦૨
અસ્ય વ્રતાનિ નાધૃષે પવમાનસ્ય દૂઢ્યા ।
રુજ યસ્ત્વા પૃતન્યતિ ॥ ૯.૦૫૩.૦૩
તં હિન્વન્તિ મદચ્યુતં હરિં નદીષુ વાજિનમ્ ।

ઇન્દુમિન્દ્રાય મત્સરમ્ ॥ ૯.૦૫૩.૦૪

અસ્ય પ્રત્નામનુ દ્યુતં શુક્રં દુદુહ્રે અહ્રયઃ ।

પયઃ સહસ્રસામૃષિમ્ ॥ ૯.૦૫૪.૦૧

અયં સૂર્ય ઇવોપદૃગયં સરાંસિ ધાવતિ ।

સપ્ત પ્રવત આ દિવમ્ ॥ ૯.૦૫૪.૦૨

અયં વિશ્વાનિ તિષ્ઠતિ પુનાનો ભુવનોપરિ ।

સોમો દેવો ન સૂર્યઃ ॥ ૯.૦૫૪.૦૩

પરિ ણો દેવવીતયે વાજાઁ અર્ષસિ ગોમતઃ ।

પુનાન ઇન્દવિન્દ્રયુઃ ॥ ૯.૦૫૪.૦૪

યવંયવં નો અન્ધસા પુષ્ટમ્પુષ્ટં પરિ સ્રવ ।

સોમ વિશ્વા ચ સૌભગા ॥ ૯.૦૫૫.૦૧

ઇન્દો યથા તવ સ્તવો યથા તે જાતમન્ધસઃ ।

નિ બર્હિષિ પ્રિયે સદઃ ॥ ૯.૦૫૫.૦૨

ઉત નો ગોવિદશ્વવિત્પવસ્વ સોમાન્ધસા ।

મક્ષૂતમેભિરહભિઃ ॥ ૯.૦૫૫.૦૩

યો જિનાતિ ન જીયતે હન્તિ શત્રુમભીત્ય ।

સ પવસ્વ સહસ્રજિત્ ॥ ૯.૦૫૫.૦૪

પરિ સોમ ઋતં બૃહદાશુઃ પવિત્રે અર્ષતિ ।

વિઘ્નન્રક્ષાંસિ દેવયુઃ ॥ ૯.૦૫૬.૦૧

યત્સોમો વાજમર્ષતિ શતં ધારા અપસ્યુવઃ ।

ઇન્દ્રસ્ય સખ્યમાવિશન્ ॥ ૯.૦૫૬.૦૨

અભિ ત્વા યોષણો દશ જારં ન કન્યાનૂષત ।

મૃજ્યસે સોમ સાતયે ॥ ૯.૦૫૬.૦૩

ત્વમિન્દ્રાય વિષ્ણવે સ્વાદુરિન્દો પરિ સ્રવ ।

નૄન્સ્તોતૄન્પાહ્યંહસઃ ॥ ૯.૦૫૬.૦૪

પ્ર તે ધારા અસશ્ચતો દિવો ન યન્તિ વૃષ્ટયઃ ।

અચ્છા વાજં સહસ્રિણમ્ ॥ ૯.૦૫૭.૦૧

અભિ પ્રિયાણિ કાવ્યા વિશ્વા ચક્ષાણો અર્ષતિ ।
હરિસ્તુઞ્જાન આયુધા ॥ ૯.૦૫૭.૦૨
સ મર્મૃજાન આયુભિરિભો રાજેવ સુવ્રતઃ ।
શ્યેનો ન વંસુ ષીદતિ ॥ ૯.૦૫૭.૦૩
સ નો વિશ્વા દિવો વસૂતો પૃથિવ્યા અધિ ।
પુનાન ઇન્દવા ભર ॥ ૯.૦૫૭.૦૪
તરત્સ મન્દી ધાવતિ ધારા સુતસ્યાન્ધસઃ ।
તરત્સ મન્દી ધાવતિ ॥ ૯.૦૫૮.૦૧
ઉસ્રા વેદ વસૂનાં મર્તસ્ય દેવ્યવસઃ ।
તરત્સ મન્દી ધાવતિ ॥ ૯.૦૫૮.૦૨
ધ્વસ્રયોઃ પુરુષન્ત્યોરા સહસ્રાણિ દદ્મહે ।
તરત્સ મન્દી ધાવતિ ॥ ૯.૦૫૮.૦૩
આ યયોસ્ત્રિંશતં તના સહસ્રાણિ ચ દદ્મહે ।
તરત્સ મન્દી ધાવતિ ॥ ૯.૦૫૮.૦૪
પવસ્વ ગોજિદશ્વજિદ્વિશ્વજિત્સોમ રણ્યજિત્ ।
પ્રજાવદ્રત્નમા ભર ॥ ૯.૦૫૯.૦૧
પવસ્વાદ્ભ્યો અદાભ્યઃ પવસ્વૌષધીભ્યઃ ।
પવસ્વ ધિષણાભ્યઃ ॥ ૯.૦૫૯.૦૨
ત્વં સોમ પવમાનો વિશ્વાનિ દુરિતા તર ।
કવિઃ સીદ નિ બર્હિષિ ॥ ૯.૦૫૯.૦૩
પવમાન સ્વર્વિદો જાયમાનોઽભવો મહાન્ ।
ઇન્દો વિશ્વાઁ અભીદસિ ॥ ૯.૦૫૯.૦૪
પ્ર ગાયત્રેણ ગાયત પવમાનં વિચર્ષણિમ્ ।
ઇન્દું સહસ્રચક્ષસમ્ ॥ ૯.૦૬૦.૦૧
તં ત્વા સહસ્રચક્ષસમથો સહસ્રભર્ણસમ્ ।
અતિ વારમપાવિષુઃ ॥ ૯.૦૬૦.૦૨
અતિ વારાન્પવમાનો અસિષ્યદત્કલશાઁ અભિ ધાવતિ ।

ઇન્દ્રસ્ય હાર્દ્યાવિશન્ ॥ ૯.૦૬૦.૦૩

ઇન્દ્રસ્ય સોમ રાધસે શં પવસ્વ વિચર્ષણે ।

પ્રજાવદ્રેત આ ભર ॥ ૯.૦૬૦.૦૪

અયા વીતી પરિ સ્રવ યસ્ત ઇન્દો મદેષ્વા ।

અવાહન્નવતીર્નવ ॥ ૯.૦૬૧.૦૧

પુરઃ સદ્ય ઇત્થાધિયે દિવોદાસાય શમ્બરમ્ ।

અધ ત્યં તુર્વશં યદુમ્ ॥ ૯.૦૬૧.૦૨

પરિ ણો અશ્વમશ્વવિદ્ગોમદિન્દો હિરણ્યવત્ ।

ક્ષરા સહસ્રિણીરિષઃ ॥ ૯.૦૬૧.૦૩

પવમાનસ્ય તે વયં પવિત્રમભ્યુન્દતઃ ।

સખિત્વમા વૃણીમહે ॥ ૯.૦૬૧.૦૪

યે તે પવિત્રમૂર્મયોઽભિક્ષરન્તિ ધારયા ।

તેભિર્નઃ સોમ મૃળય ॥ ૯.૦૬૧.૦૫

સ નઃ પુનાન આ ભર રયિં વીરવતીમિષમ્ ।

ઈશાનઃ સોમ વિશ્વતઃ ॥ ૯.૦૬૧.૦૬

એતમુ ત્યં દશ ક્ષિપો મૃજન્તિ સિન્ધુમાતરમ્ ।

સમાદિત્યેભિરખ્યત ॥ ૯.૦૬૧.૦૭

સમિન્દ્રેણોત વાયુના સુત એતિ પવિત્ર આ ।

સં સૂર્યસ્ય રશ્મિભિઃ ॥ ૯.૦૬૧.૦૮

સ નો ભગાય વાયવે પૂષ્ણે પવસ્વ મધુમાન્ ।

ચારુર્મિત્રે વરુણે ચ ॥ ૯.૦૬૧.૦૯

ઉચ્ચા તે જાતમન્ધસો દિવિ ષદ્ભૂમ્યા દદે ।

ઉગ્રં શર્મ મહિ શ્રવઃ ॥ ૯.૦૬૧.૧૦

એના વિશ્વાન્યર્ય આ દ્યુમ્નાનિ માનુષાણામ્ ।

સિષાસન્તો વનામહે ॥ ૯.૦૬૧.૧૧

સ ન ઇન્દ્રાય યજ્યવે વરુણાય મરુદ્ભ્યઃ ।

વરિવોવિત્પરિ સ્રવ ॥ ૯.૦૬૧.૧૨

ઉપો ષુ જાતમપ્તુરં ગોભિર્ભઙ્ગં પરિષ્કૃતમ્ ।
ઇન્દું દેવા અયાસિષુઃ ॥ ૯.૦૬૧.૧૩
તમિદ્વર્ધન્તુ નો ગિરો વત્સં સંશિશ્વરીરિવ ।
ય ઇન્દ્રસ્ય હૃદંસનિઃ ॥ ૯.૦૬૧.૧૪
અર્ષા ણઃ સોમ શં ગવે ધુક્ષસ્વ પિપ્યુષીમિષમ્ ।
વર્ધા સમુદ્રમુક્થ્યમ્ ॥ ૯.૦૬૧.૧૫
પવમાનો અજીજનદ્દિવશ્ચિત્રં ન તન્યતુમ્ ।
જ્યોતિર્વૈશ્વાનરં બૃહત્ ॥ ૯.૦૬૧.૧૬
પવમાનસ્ય તે રસો મદો રાજન્નદુચ્છુનઃ ।
વિ વારમવ્યમર્ષતિ ॥ ૯.૦૬૧.૧૭
પવમાન રસસ્તવ દક્ષો વિ રાજતિ દ્યુમાન્ ।
જ્યોતિર્વિશ્વં સ્વર્દૃશે ॥ ૯.૦૬૧.૧૮
યસ્તે મદો વરેણ્યસ્તેના પવસ્વાન્ધસા ।
દેવાવીરઘશંસહા ॥ ૯.૦૬૧.૧૯
જઘ્નિર્વૃત્રમમિત્રિયં સસ્નિર્વાજં દિવેદિવે ।
ગોષા ઉ અશ્વસા અસિ ॥ ૯.૦૬૧.૨૦
સમ્મિશ્લો અરુષો ભવ સૂપસ્થાભિર્ન ધેનુભિઃ ।
સીદઞ્છ્યેનો ન યોનિમા ॥ ૯.૦૬૧.૨૧
સ પવસ્વ ય આવિથેન્દ્રં વૃત્રાય હન્તવે ।
વવ્રિવાંસં મહીરપઃ ॥ ૯.૦૬૧.૨૨
સુવીરાસો વયં ધના જયેમ સોમ મીઢ્વઃ ।
પુનાનો વર્ધ નો ગિરઃ ॥ ૯.૦૬૧.૨૩
ત્વોતાસસ્તવાવસા સ્યામ વન્વન્ત આમુરઃ ।
સોમ વ્રતેષુ જાગૃહિ ॥ ૯.૦૬૧.૨૪
અપઘ્નન્પવતે મૃધોઽપ સોમો અરાવ્ણઃ ।
ગચ્છન્નિન્દ્રસ્ય નિષ્કૃતમ્ ॥ ૯.૦૬૧.૨૫
મહો નો રાય આ ભર પવમાન જહી મૃધઃ ।

રાસ્વેન્દો વીરવદ્યશઃ ॥ ૯.૦૬૧.૨૬
ન ત્વા શતં ચન હ્રુતો રાધો દિત્સન્તમા મિનન્ ।
યત્પુનાનો મખસ્યસે ॥ ૯.૦૬૧.૨૭
પવસ્વેન્દો વૃષા સુતઃ કૃધી નો યશસો જને ।
વિશ્વા અપ દ્વિષો જહિ ॥ ૯.૦૬૧.૨૮
અસ્ય તે સખ્યે વયં તવેન્દો દ્યુમ્ન ઉત્તમે ।
સાસહ્યામ પૃતન્યતઃ ॥ ૯.૦૬૧.૨૯
યા તે ભીમાન્યાયુધા તિગ્માનિ સન્તિ ધૂર્વણે ।
રક્ષા સમસ્ય નો નિદઃ ॥ ૯.૦૬૧.૩૦
એતે અસૃગ્રમિન્દવસ્તિરઃ પવિત્રમાશવઃ ।
વિશ્વાન્યભિ સૌભગા ॥ ૯.૦૬૨.૦૧
વિઘ્નન્તો દુરિતા પુરુ સુગા તોકાય વાજિનઃ ।
તના કૃણ્વન્તો અર્વતે ॥ ૯.૦૬૨.૦૨
કૃણ્વન્તો વરિવો ગવેઽભ્યર્ષન્તિ સુષ્ટુતિમ્ ।
ઇળામસ્મભ્યં સંયતમ્ ॥ ૯.૦૬૨.૦૩
અસાવ્યંશુર્મદાયાપ્સુ દક્ષો ગિરિષ્ઠાઃ ।
શ્યેનો ન યોનિમાસદત્ ॥ ૯.૦૬૨.૦૪
શુભ્રમન્ધો દેવવાતમપ્સુ ધૂતો નૃભિઃ સુતઃ ।
સ્વદન્તિ ગાવઃ પયોભિઃ ॥ ૯.૦૬૨.૦૫
આદીમશ્વં ન હેતારોઽશૂશુભન્નમૃતાય ।
મધ્વો રસં સધમાદે ॥ ૯.૦૬૨.૦૬
યાસ્તે ધારા મધુશ્ચુતોઽસૃગ્રમિન્દ ઊતયે ।
તાભિઃ પવિત્રમાસદઃ ॥ ૯.૦૬૨.૦૭
સો અર્ષેન્દ્રાય પીતયે તિરો રોમાણ્યવ્યયા ।
સીદન્યોના વનેષ્વા ॥ ૯.૦૬૨.૦૮
ત્વમિન્દો પરિ સ્રવ સ્વાદિષ્ઠો અઙ્ગિરોભ્યઃ ।
વરિવોવિદ્ઘૃતં પયઃ ॥ ૯.૦૬૨.૦૯

અયં વિચર્ષણિર્હિતઃ પવમાનઃ સ ચેતતિ ।

હિન્વાન આપ્યં બૃહત્ ॥ ૯.૦૬૨.૧૦

એષ વૃષા વૃષવ્રતઃ પવમાનો અશસ્તિહા ।

કરદ્વસૂનિ દાશુષે ॥ ૯.૦૬૨.૧૧

આ પવસ્વ સહસ્રિણં રયિં ગોમન્તમશ્વિનમ્ ।

પુરુશ્ચન્દ્રં પુરુસ્પૃહમ્ ॥ ૯.૦૬૨.૧૨

એષ સ્ય પરિ ષિચ્યતે મર્મૃજ્યમાન આયુભિઃ ।

ઉરુગાયઃ કવિક્રતુઃ ॥ ૯.૦૬૨.૧૩

સહસ્રોતિઃ શતામઘો વિમાનો રજસઃ કવિઃ ।

ઇન્દ્રાય પવતે મદઃ ॥ ૯.૦૬૨.૧૪

ગિરા જાત ઇહ સ્તુત ઇન્દુરિન્દ્રાય ધીયતે ।

વિર્યોના વસતાવિવ ॥ ૯.૦૬૨.૧૫

પવમાનઃ સુતો નૃભિઃ સોમો વાજમિવાસરત્ ।

ચમૂષુ શક્મનાસદમ્ ॥ ૯.૦૬૨.૧૬

તં ત્રિપૃષ્ઠે ત્રિવન્ધુરે રથે યુઞ્જન્તિ યાતવે ।

ઋષીણાં સપ્ત ધીતિભિઃ ॥ ૯.૦૬૨.૧૭

તં સોતારો ધનસ્પૃતમાશું વાજાય યાતવે ।

હરિં હિનોત વાજિનમ્ ॥ ૯.૦૬૨.૧૮

આવિશન્કલશં સુતો વિશ્વા અર્ષન્નભિ શ્રિયઃ ।

શૂરો ન ગોષુ તિષ્ઠતિ ॥ ૯.૦૬૨.૧૯

આ ત ઇન્દો મદાય કં પયો દુહન્ત્યાયવઃ ।

દેવા દેવેભ્યો મધુ ॥ ૯.૦૬૨.૨૦

આ નઃ સોમં પવિત્ર આ સૃજતા મધુમત્તમમ્ ।

દેવેભ્યો દેવશ્રુત્તમમ્ ॥ ૯.૦૬૨.૨૧

એતે સોમા અસૃક્ષત ગૃણાનાઃ શ્રવસે મહે ।

મદિન્તમસ્ય ધારયા ॥ ૯.૦૬૨.૨૨

અભિ ગવ્યાનિ વીતયે નૃમ્ણા પુનાનો અર્ષસિ ।

સનદ્વાજઃ પરિ સ્રવ ॥ ૯.૦૬૨.૨૩
ઉત નો ગોમતીરિષો વિશ્વા અર્ષ પરિષ્ટુભઃ ।
ગૃણાનો જમદગ્નિના ॥ ૯.૦૬૨.૨૪
પવસ્વ વાચો અગ્રિયઃ સોમ ચિત્રાભિરૂતિભિઃ ।
અભિ વિશ્વાનિ કાવ્યા ॥ ૯.૦૬૨.૨૫
ત્વં સમુદ્રિયા અપોઽગ્રિયો વાચ ઈરયન્ ।
પવસ્વ વિશ્વમેજય ॥ ૯.૦૬૨.૨૬
તુભ્યેમા ભુવના કવે મહિમ્ને સોમ તસ્થિરે ।
તુભ્યમર્ષન્તિ સિન્ધવઃ ॥ ૯.૦૬૨.૨૭
પ્ર તે દિવો ન વૃષ્ટયો ધારા યન્ત્યસશ્ચતઃ ।
અભિ શુક્રામુપસ્તિરમ્ ॥ ૯.૦૬૨.૨૮
ઇન્દ્રાયેન્દું પુનીતનોગ્રં દક્ષાય સાધનમ્ ।
ઈશાનં વીતિરાધસમ્ ॥ ૯.૦૬૨.૨૯
પવમાન ઋતઃ કવિઃ સોમઃ પવિત્રમાસદત્ ।
દધત્સ્તોત્રે સુવીર્યમ્ ॥ ૯.૦૬૨.૩૦
આ પવસ્વ સહસ્રિણં રયિં સોમ સુવીર્યમ્ ।
અસ્મે શ્રવાંસિ ધારય ॥ ૯.૦૬૩.૦૧
ઇષમૂર્જં ચ પિન્વસ ઇન્દ્રાય મત્સરિન્તમઃ ।
ચમૂષ્વા નિ ષીદસિ ॥ ૯.૦૬૩.૦૨
સુત ઇન્દ્રાય વિષ્ણવે સોમઃ કલશે અક્ષરત્ ।
મધુમાઁ અસ્તુ વાયવે ॥ ૯.૦૬૩.૦૩
એતે અસૃગ્રમાશવોઽતિ હ્વરાંસિ બભ્રવઃ ।
સોમા ઋતસ્ય ધારયા ॥ ૯.૦૬૩.૦૪
ઇન્દ્રં વર્ધન્તો અપ્તુરઃ કૃણ્વન્તો વિશ્વમાર્યમ્ ।
અપઘ્નન્તો અરાવ્ણઃ ॥ ૯.૦૬૩.૦૫
સુતા અનુ સ્વમા રજોઽભ્યર્ષન્તિ બભ્રવઃ ।
ઇન્દ્રં ગચ્છન્ત ઇન્દવઃ ॥ ૯.૦૬૩.૦૬

અયા પવસ્વ ધારયા યયા સૂર્યમરોચયઃ ।

હિન્વાનો માનુષીરપઃ ॥ ૯.૦૬૩.૦૭

અયુક્ત સૂર એતશં પવમાનો મનાવધિ ।

અન્તરિક્ષેણ યાતવે ॥ ૯.૦૬૩.૦૮

ઉત ત્યા હરિતો દશ સૂરો અયુક્ત યાતવે ।

ઇન્દુરિન્દ્ર ઇતિ બ્રુવન્ ॥ ૯.૦૬૩.૦૯

પરીતો વાયવે સુતં ગિર ઇન્દ્રાય મત્સરમ્ ।

અવ્યો વારેષુ સિઞ્ચત ॥ ૯.૦૬૩.૧૦

પવમાન વિદા રયિમસ્મભ્યં સોમ દુષ્ટરમ્ ।

યો દૂણાશો વનુષ્યતા ॥ ૯.૦૬૩.૧૧

અભ્યર્ષ સહસ્રિણં રયિં ગોમન્તમશ્વિનમ્ ।

અભિ વાજમુત શ્રવઃ ॥ ૯.૦૬૩.૧૨

સોમો દેવો ન સૂર્યોઽદ્રિભિઃ પવતે સુતઃ ।

દધાનઃ કલશે રસમ્ ॥ ૯.૦૬૩.૧૩

એતે ધામાન્યાર્યા શુક્રા ઋતસ્ય ધારયા ।

વાજં ગોમન્તમક્ષરન્ ॥ ૯.૦૬૩.૧૪

સુતા ઇન્દ્રાય વજ્રિણે સોમાસો દધ્યાશિરઃ ।

પવિત્રમત્યક્ષરન્ ॥ ૯.૦૬૩.૧૫

પ્ર સોમ મધુમત્તમો રાયે અર્ષ પવિત્ર આ ।

મદો યો દેવવીતમઃ ॥ ૯.૦૬૩.૧૬

તમી મૃજન્ત્યાયવો હરિં નદીષુ વાજિનમ્ ।

ઇન્દુમિન્દ્રાય મત્સરમ્ ॥ ૯.૦૬૩.૧૭

આ પવસ્વ હિરણ્યવદશ્વાવત્સોમ વીરવત્ ।

વાજં ગોમન્તમા ભર ॥ ૯.૦૬૩.૧૮

પરિ વાજે ન વાજયુમવ્યો વારેષુ સિઞ્ચત ।

ઇન્દ્રાય મધુમત્તમમ્ ॥ ૯.૦૬૩.૧૯

કવિં મૃજન્તિ મર્જ્યં ધીભિર્વિપ્રા અવસ્યવઃ ।

વૃષા કનિક્રદર્ષતિ ॥ ૯.૦૬૩.૨૦
વૃષણં ધીભિરપ્તુરં સોમમૃતસ્ય ધારયા ।
મતી વિપ્રાઃ સમસ્વરન્ ॥ ૯.૦૬૩.૨૧
પવસ્વ દેવાયુષગિન્દ્રં ગચ્છતુ તે મદઃ ।
વાયુમા રોહ ધર્મણા ॥ ૯.૦૬૩.૨૨
પવમાન નિ તોશસે રયિં સોમ શ્રવાય્યમ્ ।
પ્રિયઃ સમુદ્રમા વિશ ॥ ૯.૦૬૩.૨૩
અપઘ્નન્પવસે મૃધઃ ક્રતુવિત્સોમ મત્સરઃ ।
નુદસ્વાદેવયું જનમ્ ॥ ૯.૦૬૩.૨૪
પવમાના અસૃક્ષત સોમાઃ શુક્રાસ ઇન્દવઃ ।
અભિ વિશ્વાનિ કાવ્યા ॥ ૯.૦૬૩.૨૫
પવમાનાસ આશવઃ શુભ્રા અસૃગ્રમિન્દવઃ ।
ઘ્નન્તો વિશ્વા અપ દ્વિષઃ ॥ ૯.૦૬૩.૨૬
પવમાના દિવસ્પર્યન્તરિક્ષાદસૃક્ષત ।
પૃથિવ્યા અધિ સાનવિ ॥ ૯.૦૬૩.૨૭
પુનાનઃ સોમ ધારયેન્દો વિશ્વા અપ સ્રિધઃ ।
જહિ રક્ષાંસિ સુક્રતો ॥ ૯.૦૬૩.૨૮
અપઘ્નન્સોમ રક્ષસોઽભ્યર્ષ કનિક્રદત્ ।
દ્યુમન્તં શુષ્મમુત્તમમ્ ॥ ૯.૦૬૩.૨૯
અસ્મે વસૂનિ ધારય સોમ દિવ્યાનિ પાર્થિવા ।
ઇન્દો વિશ્વાનિ વાર્યા ॥ ૯.૦૬૩.૩૦
વૃષા સોમ દ્યુમાઁ અસિ વૃષા દેવ વૃષવ્રતઃ ।
વૃષા ધર્માણિ દધિષે ॥ ૯.૦૬૪.૦૧
વૃષ્ણસ્તે વૃષ્ણ્યં શવો વૃષા વનં વૃષા મદઃ ।
સત્યં વૃષન્વૃષેદસિ ॥ ૯.૦૬૪.૦૨
અશ્વો ન ચક્રદો વૃષા સં ગા ઇન્દો સમર્વતઃ ।
વિ નો રાયે દુરો વૃધિ ॥ ૯.૦૬૪.૦૩

અસૃક્ષત પ્ર વાજિનો ગવ્યા સોમાસો અશ્વયા ।
શુક્રાસો વીરયાશવઃ ॥ ૯.૦૬૪.૦૪
શુમ્ભમાના ઋતાયુભિર્મૃજ્યમાના ગભસ્ત્યોઃ ।
પવન્તે વારે અવ્યયે ॥ ૯.૦૬૪.૦૫
તે વિશ્વા દાશુષે વસુ સોમા દિવ્યાનિ પાર્થિવા ।
પવન્તામાન્તરિક્ષ્યા ॥ ૯.૦૬૪.૦૬
પવમાનસ્ય વિશ્વવિત્પ્ર તે સર્ગા અસૃક્ષત ।
સૂર્યસ્યેવ ન રશ્મયઃ ॥ ૯.૦૬૪.૦૭
કેતું કૃણ્વન્દિવસ્પરિ વિશ્વા રૂપાભ્યર્ષસિ ।
સમુદ્રઃ સોમ પિન્વસે ॥ ૯.૦૬૪.૦૮
હિન્વાનો વાચમિષ્યસિ પવમાન વિધર્મણિ ।
અક્રાન્દેવો ન સૂર્યઃ ॥ ૯.૦૬૪.૦૯
ઇન્દુઃ પવિષ્ટ ચેતનઃ પ્રિયઃ કવીનાં મતી ।
સૃજદશ્વં રથીરિવ ॥ ૯.૦૬૪.૧૦
ઊર્મિર્યસ્તે પવિત્ર આ દેવાવીઃ પર્યક્ષરત્ ।
સીદન્નૃતસ્ય યોનિમા ॥ ૯.૦૬૪.૧૧
સ નો અર્ષ પવિત્ર આ મદો યો દેવવીતમઃ ।
ઇન્દવિન્દ્રાય પીતયે ॥ ૯.૦૬૪.૧૨
ઇષે પવસ્વ ધારયા મૃજ્યમાનો મનીષિભિઃ ।
ઇન્દો રુચાભિ ગા ઇહિ ॥ ૯.૦૬૪.૧૩
પુનાનો વરિવસ્કૃધ્યૂર્જં જનાય ગિર્વણઃ ।
હરે સૃજાન આશિરમ્ ॥ ૯.૦૬૪.૧૪
પુનાનો દેવવીતય ઇન્દ્રસ્ય યાહિ નિષ્કૃતમ્ ।
દ્યુતાનો વાજિભિર્યતઃ ॥ ૯.૦૬૪.૧૫
પ્ર હિન્વાનાસ ઇન્દવોઽચ્છા સમુદ્રમાશવઃ ।
ધિયા જૂતા અસૃક્ષત ॥ ૯.૦૬૪.૧૬
મર્મૃજાનાસ આયવો વૃથા સમુદ્રમિન્દવઃ ।

અગ્મન્નૃતસ્ય યોનિમા ॥ ૯.૦૬૪.૧૭
પરિ ણો યાહ્યસ્મયુર્વિશ્વા વસૂન્યોજસા ।
પાહિ નઃ શર્મ વીરવત્ ॥ ૯.૦૬૪.૧૮
મિમાતિ વહ્નિરેતશઃ પદં યુજાન ઋક્વભિઃ ।
પ્ર યત્સમુદ્ર આહિતઃ ॥ ૯.૦૬૪.૧૯
આ યદ્યોનિં હિરણ્યયમાશુરૃતસ્ય સીદતિ ।
જહાત્યપ્રચેતસઃ ॥ ૯.૦૬૪.૨૦
અભિ વેના અનૂષતેયક્ષન્તિ પ્રચેતસઃ ।
મજ્જન્ત્યવિચેતસઃ ॥ ૯.૦૬૪.૨૧
ઇન્દ્રાયેન્દો મરુત્વતે પવસ્વ મધુમત્તમઃ ।
ઋતસ્ય યોનિમાસદમ્ ॥ ૯.૦૬૪.૨૨
તં ત્વા વિપ્રા વચોવિદઃ પરિ ષ્કૃણ્વન્તિ વેધસઃ ।
સં ત્વા મૃજન્ત્યાયવઃ ॥ ૯.૦૬૪.૨૩
રસં તે મિત્રો અર્યમા પિબન્તિ વરુણઃ કવે ।
પવમાનસ્ય મરુતઃ ॥ ૯.૦૬૪.૨૪
ત્વં સોમ વિપશ્ચિતં પુનાનો વાચમિષ્યસિ ।
ઇન્દો સહસ્રભર્ણસમ્ ॥ ૯.૦૬૪.૨૫
ઉતો સહસ્રભર્ણસં વાચં સોમ મખસ્યુવમ્ ।
પુનાન ઇન્દવા ભર ॥ ૯.૦૬૪.૨૬
પુનાન ઇન્દવેષાં પુરુહૂત જનાનામ્ ।
પ્રિયઃ સમુદ્રમા વિશ ॥ ૯.૦૬૪.૨૭
દવિદ્યુતત્યા રુચા પરિષ્ટોભન્ત્યા કૃપા ।
સોમાઃ શુક્રા ગવાશિરઃ ॥ ૯.૦૬૪.૨૮
હિન્વાનો હેતૃભિર્યત આ વાજં વાજ્યક્રમીત્ ।
સીદન્તો વનુષો યથા ॥ ૯.૦૬૪.૨૯
ઋધક્સોમ સ્વસ્તયે સંજગ્માનો દિવઃ કવિઃ ।
પવસ્વ સૂર્યો દૃશે ॥ ૯.૦૬૪.૩૦

હિન્વન્તિ સૂરમુસ્રયઃ સ્વસારો જામયસ્પતિમ્ ।
મહામિન્દું મહીયુવઃ ॥ ૯.૦૬૫.૦૧
પવમાન રુચારુચા દેવો દેવેભ્યસ્પરિ ।
વિશ્વા વસૂન્યા વિશ ॥ ૯.૦૬૫.૦૨
આ પવમાન સુષ્ટુતિં વૃષ્ટિં દેવેભ્યો દુવઃ ।
ઇષે પવસ્વ સંયતમ્ ॥ ૯.૦૬૫.૦૩
વૃષા હ્યસિ ભાનુના દ્યુમન્તં ત્વા હવામહે ।
પવમાન સ્વાધ્યઃ ॥ ૯.૦૬૫.૦૪
આ પવસ્વ સુવીર્યં મન્દમાનઃ સ્વાયુધ ।
ઇહો ષ્વિન્દવા ગહિ ॥ ૯.૦૬૫.૦૫
યદદ્ભિઃ પરિષિચ્યસે મૃજ્યમાનો ગભસ્ત્યોઃ ।
દ્રુણા સધસ્થમશ્નુષે ॥ ૯.૦૬૫.૦૬
પ્ર સોમાય વ્યશ્વવત્પવમાનાય ગાયત ।
મહે સહસ્રચક્ષસે ॥ ૯.૦૬૫.૦૭
યસ્ય વર્ણં મધુશ્ચુતં હરિં હિન્વન્ત્યદ્રિભિઃ ।
ઇન્દુમિન્દ્રાય પીતયે ॥ ૯.૦૬૫.૦૮
તસ્ય તે વાજિનો વયં વિશ્વા ધનાનિ જિગ્યુષઃ ।
સખિત્વમા વૃણીમહે ॥ ૯.૦૬૫.૦૯
વૃષા પવસ્વ ધારયા મરુત્વતે ચ મત્સરઃ ।
વિશ્વા દધાન ઓજસા ॥ ૯.૦૬૫.૧૦
તં ત્વા ધર્તારમોણ્યો૩ઃ પવમાન સ્વર્દૃશમ્ ।
હિન્વે વાજેષુ વાજિનમ્ ॥ ૯.૦૬૫.૧૧
અયા ચિત્તો વિપાનયા હરિઃ પવસ્વ ધારયા ।
યુજં વાજેષુ ચોદય ॥ ૯.૦૬૫.૧૨
આ ન ઇન્દો મહીમિષં પવસ્વ વિશ્વદર્શતઃ ।
અસ્મભ્યં સોમ ગાતુવિત્ ॥ ૯.૦૬૫.૧૩
આ કલશા અનૂષતેન્દો ધારાભિરોજસા ।

એન્દ્રસ્ય પીતયે વિશ ॥ ૯.૦૬૫.૧૪
યસ્ય તે મદ્યં રસં તીવ્રં દુહન્ત્યદ્રિભિઃ ।
સ પવસ્વાભિમાતિહા ॥ ૯.૦૬૫.૧૫
રાજા મેધાભિરીયતે પવમાનો મનાવધિ ।
અન્તરિક્ષેણ યાતવે ॥ ૯.૦૬૫.૧૬
આ ન ઇન્દો શતગ્વિનં ગવાં પોષં સ્વશ્વ્યમ્ ।
વહા ભગત્તિમૂતયે ॥ ૯.૦૬૫.૧૭
આ નઃ સોમ સહો જુવો રૂપં ન વર્ચસે ભર ।
સુષ્વાણો દેવવીતયે ॥ ૯.૦૬૫.૧૮
અર્ષા સોમ દ્યુમત્તમોऽભિ દ્રોણાનિ રોરુવત્ ।
સીદઞ્છ્યેનો ન યોનિમા ॥ ૯.૦૬૫.૧૯
અપ્સા ઇન્દ્રાય વાયવે વરુણાય મરુદ્ભ્યઃ ।
સોમો અર્ષતિ વિષ્ણવે ॥ ૯.૦૬૫.૨૦
ઇષં તોકાય નો દધદસ્મભ્યં સોમ વિશ્વતઃ ।
આ પવસ્વ સહસ્રિણમ્ ॥ ૯.૦૬૫.૨૧
યે સોમાસઃ પરાવતિ યે અર્વાવતિ સુન્વિરે ।
યે વાદઃ શર્યણાવતિ ॥ ૯.૦૬૫.૨૨
ય આર્જીકેષુ કૃત્વસુ યે મધ્યે પસ્ત્યાનામ્ ।
યે વા જનેષુ પઞ્ચસુ ॥ ૯.૦૬૫.૨૩
તે નો વૃષ્ટિં દિવસ્પરિ પવન્તામા સુવીર્યમ્ ।
સુવાના દેવાસ ઇન્દવઃ ॥ ૯.૦૬૫.૨૪
પવતે હર્યતો હરિર્ગૃણાનો જમદગ્નિના ।
હિન્વાનો ગોરધિ ત્વચિ ॥ ૯.૦૬૫.૨૫
પ્ર શુક્રાસો વયોજુવો હિન્વાનાસો ન સપ્તયઃ ।
શ્રીણાના અપ્સુ મૃઞ્જત ॥ ૯.૦૬૫.૨૬
તં ત્વા સુતેષ્વાભુવો હિન્વિરે દેવતાતયે ।
સ પવસ્વાનયા રુચા ॥ ૯.૦૬૫.૨૭

આ તે દક્ષં મયોભુવં વહ્નિમદ્યા વૃણીમહે ।
પાન્તમા પુરુસ્પૃહમ્ ॥ ૯.૦૬૫.૨૮
આ મન્દ્રમા વરેણ્યમા વિપ્રમા મનીષિણમ્ ।
પાન્તમા પુરુસ્પૃહમ્ ॥ ૯.૦૬૫.૨૯
આ રયિમા સુચેતુનમા સુક્રતો તનૂષ્વા ।
પાન્તમા પુરુસ્પૃહમ્ ॥ ૯.૦૬૫.૩૦
પવસ્વ વિશ્વચર્ષણેઽભિ વિશ્વાનિ કાવ્યા ।
સખા સખિભ્ય ઈડ્યઃ ॥ ૯.૦૬૬.૦૧
તાભ્યાં વિશ્વસ્ય રાજસિ યે પવમાન ધામની ।
પ્રતીચી સોમ તસ્થતુઃ ॥ ૯.૦૬૬.૦૨
પરિ ધામાનિ યાનિ તે ત્વં સોમાસિ વિશ્વતઃ ।
પવમાન ઋતુભિઃ કવે ॥ ૯.૦૬૬.૦૩
પવસ્વ જનયન્નિષોઽભિ વિશ્વાનિ વાર્યા ।
સખા સખિભ્ય ઊતયે ॥ ૯.૦૬૬.૦૪
તવ શુક્રાસો અર્ચયો દિવસ્પૃષ્ઠે વિ તન્વતે ।
પવિત્રં સોમ ધામભિઃ ॥ ૯.૦૬૬.૦૫
તવેમે સપ્ત સિન્ધવઃ પ્રશિષં સોમ સિસ્રતે ।
તુભ્યં ધાવન્તિ ધેનવઃ ॥ ૯.૦૬૬.૦૬
પ્ર સોમ યાહિ ધારયા સુત ઇન્દ્રાય મત્સરઃ ।
દધાનો અક્ષિતિ શ્રવઃ ॥ ૯.૦૬૬.૦૭
સમુ ત્વા ધીભિરસ્વરન્હિન્વતીઃ સપ્ત જામયઃ ।
વિપ્રમાજા વિવસ્વતઃ ॥ ૯.૦૬૬.૦૮
મૃજન્તિ ત્વા સમગ્રુવોઽવ્યે જીરાવધિ ષ્વણિ ।
રેભો યદજ્યસે વને ॥ ૯.૦૬૬.૦૯
પવમાનસ્ય તે કવે વાજિન્સર્ગા અસૃક્ષત ।
અર્વન્તો ન શ્રવસ્યવઃ ॥ ૯.૦૬૬.૧૦
અચ્છા કોશં મધુશ્ચુતમસૃગ્રં વારે અવ્યયે ।

અવાવશન્ત ધીતયઃ ॥ ૯.૦૬૬.૧૧

અચ્છા સમુદ્રમિન્દવોઽસ્તં ગાવો ન ધેનવઃ ।

અગ્મન્નૃતસ્ય યોનિમા ॥ ૯.૦૬૬.૧૨

પ્ર ણ ઇન્દો મહે રણ આપો અર્ષન્તિ સિન્ધવઃ ।

યદ્ગોભિર્વાસયિષ્યસે ॥ ૯.૦૬૬.૧૩

અસ્ય તે સખ્યે વયમિયક્ષન્તસ્ત્વોતયઃ ।

ઇન્દો સખિત્વમુશ્મસિ ॥ ૯.૦૬૬.૧૪

આ પવસ્વ ગવિષ્ટયે મહે સોમ નૃચક્ષસે ।

એન્દ્રસ્ય જઠરે વિશ ॥ ૯.૦૬૬.૧૫

મહાઁ અસિ સોમ જ્યેષ્ઠ ઉગ્રાણામિન્દ ઓજિષ્ઠઃ ।

યુધ્વા સઞ્છશ્વજ્જિગેથ ॥ ૯.૦૬૬.૧૬

ય ઉગ્રેભ્યશ્ચિદોજીયાઞ્છૂરેભ્યશ્ચિચ્છૂરતરઃ ।

ભૂરિદાભ્યશ્ચિન્મંહીયાન્ ॥ ૯.૦૬૬.૧૭

ત્વં સોમ સૂર એષસ્તોકસ્ય સાતા તનૂનામ્ ।

વૃણીમહે સખ્યાય વૃણીમહે યુજ્યાય ॥ ૯.૦૬૬.૧૮

અગ્ન આયૂંષિ પવસ આ સુવોર્જમિષં ચ નઃ ।

આરે બાધસ્વ દુચ્છુનામ્ ॥ ૯.૦૬૬.૧૯

અગ્નિરૃષિઃ પવમાનઃ પાઞ્ચજન્યઃ પુરોહિતઃ ।

તમીમહે મહાગયમ્ ॥ ૯.૦૬૬.૨૦

અગ્ને પવસ્વ સ્વપા અસ્મે વર્ચઃ સુવીર્યમ્ ।

દધદ્રયિં મયિ પોષમ્ ॥ ૯.૦૬૬.૨૧

પવમાનો અતિ સ્રિધોઽભ્યર્ષતિ સુષ્ટુતિમ્ ।

સૂરો ન વિશ્વદર્શતઃ ॥ ૯.૦૬૬.૨૨

સ મર્મૃજાન આયુભિઃ પ્રયસ્વાન્પ્રયસે હિતઃ ।

ઇન્દુરત્યો વિચક્ષણઃ ॥ ૯.૦૬૬.૨૩

પવમાન ઋતં બૃહચ્છુક્રં જ્યોતિરજીજનત્ ।

કૃષ્ણા તમાંસિ જઙ્ઘનત્ ॥ ૯.૦૬૬.૨૪

પવમાનસ્ય જઙ્ઘ્નતો હરેશ્ચન્દ્રા અસૃક્ષત ।
જીરા અજિરશોચિષઃ ॥ ૯.૦૬૬.૨૫
પવમાનો રથીતમઃ શુભ્રેભિઃ શુભ્રશસ્તમઃ ।
હરિશ્ચન્દ્રો મરુદ્ગણઃ ॥ ૯.૦૬૬.૨૬
પવમાનો વ્યશ્નવદ્રશ્મિભિર્વાજસાતમઃ ।
દધત્સ્તોત્રે સુવીર્યમ્ ॥ ૯.૦૬૬.૨૭
પ્ર સુવાન ઇન્દુરક્ષાઃ પવિત્રમત્યવ્યયમ્ ।
પુનાન ઇન્દુરિન્દ્રમા ॥ ૯.૦૬૬.૨૮
એષ સોમો અધિ ત્વચિ ગવાં ક્રીળત્યદ્રિભિઃ ।
ઇન્દ્રં મદાય જોહુવત્ ॥ ૯.૦૬૬.૨૯
યસ્ય તે દ્યુમ્નવત્પયઃ પવમાનાભૃતં દિવઃ ।
તેન નો મૃળ જીવસે ॥ ૯.૦૬૬.૩૦
ત્વં સોમાસિ ધારયુર્મન્દ્ર ઓજિષ્ઠો અધ્વરે ।
પવસ્વ મંહયદ્રયિઃ ॥ ૯.૦૬૭.૦૧
ત્વં સુતો નૃમાદનો દધન્વાન્મત્સરિન્તમઃ ।
ઇન્દ્રાય સૂરિરન્ધસા ॥ ૯.૦૬૭.૦૨
ત્વં સુષ્વાણો અદ્રિભિરભ્યર્ષ કનિક્રદત્ ।
દ્યુમન્તં શુષ્મમુત્તમમ્ ॥ ૯.૦૬૭.૦૩
ઇન્દુર્હિન્વાનો અર્ષતિ તિરો વારાણ્યવ્યયા ।
હરિર્વાજમચિક્રદત્ ॥ ૯.૦૬૭.૦૪
ઇન્દો વ્યવ્યમર્ષસિ વિ શ્રવાંસિ વિ સૌભગા ।
વિ વાજાન્સોમ ગોમતઃ ॥ ૯.૦૬૭.૦૫
આ ન ઇન્દો શતગ્વિનં રયિં ગોમન્તમશ્વિનમ્ ।
ભરા સોમ સહસ્રિણમ્ ॥ ૯.૦૬૭.૦૬
પવમાનાસ ઇન્દવસ્તિરઃ પવિત્રમાશવઃ ।
ઇન્દ્રં યામેભિરાશત ॥ ૯.૦૬૭.૦૭
કકુહઃ સોમ્યો રસ ઇન્દુરિન્દ્રાય પૂર્વ્યઃ ।

આયુઃ પવત આયવે ॥ ૯.૦૬૭.૦૮

હિન્વન્તિ સૂરમુસ્રયઃ પવમાનં મધુશ્ચુતમ્ ।

અભિ ગિરા સમસ્વરન્ ॥ ૯.૦૬૭.૦૯

અવિતા નો અજાશ્વઃ પૂષા યામનિયામનિ ।

આ ભક્ષત્કન્યાસુ નઃ ॥ ૯.૦૬૭.૧૦

અયં સોમઃ કપર્દિને ઘૃતં ન પવતે મધુ ।

આ ભક્ષત્કન્યાસુ નઃ ॥ ૯.૦૬૭.૧૧

અયં ત આઘૃણે સુતો ઘૃતં ન પવતે શુચિ ।

આ ભક્ષત્કન્યાસુ નઃ ॥ ૯.૦૬૭.૧૨

વાચો જન્તુઃ કવીનાં પવસ્વ સોમ ધારયા ।

દેવેષુ રત્નધા અસિ ॥ ૯.૦૬૭.૧૩

આ કલશેષુ ધાવતિ શ્યેનો વર્મ વિ ગાહતે ।

અભિ દ્રોણા કનિક્રદત્ ॥ ૯.૦૬૭.૧૪

પરિ પ્ર સોમ તે રસોઽસર્જિ કલશે સુતઃ ।

શ્યેનો ન તક્તો અર્ષતિ ॥ ૯.૦૬૭.૧૫

પવસ્વ સોમ મન્દયન્નિન્દ્રાય મધુમત્તમઃ ॥ ૯.૦૬૭.૧૬

અસૃગ્રન્દેવવીતયે વાજયન્તો રથા ઇવ ॥ ૯.૦૬૭.૧૭

તે સુતાસો મદિન્તમાઃ શુક્રા વાયુમસૃક્ષત ॥ ૯.૦૬૭.૧૮

ગ્રાવ્ણા તુન્નો અભિષ્ટુતઃ પવિત્રં સોમ ગચ્છસિ ।

દધત્સ્તોત્રે સુવીર્યમ્ ॥ ૯.૦૬૭.૧૯

એષ તુન્નો અભિષ્ટુતઃ પવિત્રમતિ ગાહતે ।

રક્ષોહા વારમવ્યયમ્ ॥ ૯.૦૬૭.૨૦

યદન્તિ યચ્ચ દૂરકે ભયં વિન્દતિ મામિહ ।

પવમાન વિ તજ્જહિ ॥ ૯.૦૬૭.૨૧

પવમાનઃ સો અદ્ય નઃ પવિત્રેણ વિચર્ષણિઃ ।

યઃ પોતા સ પુનાતુ નઃ ॥ ૯.૦૬૭.૨૨

યત્તે પવિત્રમર્ચિષ્યગ્ને વિતતમન્તરા ।

બ્રહ્મ તેન પુનીહિ નઃ ॥ ૯.૦૬૭.૨૩
યત્તે પવિત્રમર્ચિષ્યગ્ને વિતતમન્તરા ।
બ્રહ્મ તેન પુનીહિ નઃ ॥ ૯.૦૬૭.૨૩
યત્તે પવિત્રમર્ચિવદગ્ને તેન પુનીહિ નઃ ।
બ્રહ્મસવૈઃ પુનીહિ નઃ ॥ ૯.૦૬૭.૨૪
ઉભાભ્યાં દેવ સવિતઃ પવિત્રેણ સવેન ચ ।
માં પુનીહિ વિશ્વતઃ ॥ ૯.૦૬૭.૨૫
ત્રિભિષ્ટ્વં દેવ સવિતર્વર્ષિષ્ઠૈઃ સોમ ધામભિઃ ।
અગ્ને દક્ષૈઃ પુનીહિ નઃ ॥ ૯.૦૬૭.૨૬
પુનન્તુ માં દેવજનાઃ પુનન્તુ વસવો ધિયા ।
વિશ્વે દેવાઃ પુનીત મા જાતવેદઃ પુનીહિ મા ॥ ૯.૦૬૭.૨૭
પ્ર પ્યાયસ્વ પ્ર સ્યન્દસ્વ સોમ વિશ્વેભિરંશુભિઃ ।
દેવેભ્ય ઉત્તમં હવિઃ ॥ ૯.૦૬૭.૨૮
ઉપ પ્રિયં પનિપ્નતં યુવાનમાહુતીવૃધમ્ ।
અગન્મ બિભ્રતો નમઃ ॥ ૯.૦૬૭.૨૯
અલાય્યસ્ય પરશુર્નનાશ તમા પવસ્વ દેવ સોમ ।
આખું ચિદેવ દેવ સોમ ॥ ૯.૦૬૭.૩૦
યઃ પાવમાનીરધ્યેત્યૃષિભિઃ સમ્ભૃતં રસમ્ ।
સર્વં સ પૂતમશ્નાતિ સ્વદિતં માતરિશ્વના ॥ ૯.૦૬૭.૩૧
પાવમાનીર્યો અધ્યેત્યૃષિભિઃ સમ્ભૃતં રસમ્ ।
તસ્મૈ સરસ્વતી દુહે ક્ષીરં સર્પિર્મધૂદકમ્ ॥ ૯.૦૬૭.૩૨

Supplement 1 to Rigveda Mandala 9-3

ખિલાનિ પાવમાનીઃ । ૧૦ ।

પાવમાનીઃ સ્વસ્ત્યયનીઃ સુદુઘા હિ ઘૃતશ્ચુતઃ ।
ઋષિભિઃ સંભૃતો રસો બ્રાહ્મણેષ્વમૃતમ્ હિતમ્ ॥ ખિ૯-૩.૧.૨ ॥
પાવમાનીર્દિશન્તુ ન ઇમં લોકમથો અમુમ્ ।
કામાન્ સમર્ધયન્તુ નો દેવીર્દેવૈઃ સમાહિતા ॥ ખિ૯-૩.૧.૨ ॥
યેન દેવાઃ પવિત્રેણાત્માનં પુનતે સદા ।
તેન સહસ્રધારેણ પાવમાન્યઃ પુનન્તુ મામ્ ॥ ખિ૯-૩.૧.૨ ॥

પ્રાજપત્યં પવિત્રં શતોદ્યામં હિરણ્મયમ્ ।
તેન બ્રહ્મવિદો વયં પૂતં બ્રહ્મ પુનીમહે ॥ ખિ૯-૩.૧.૨ ॥

ઇન્દ્રઃ પુનીતી સહ મા પુનાતુ સોમઃ સ્વસ્ત્યા વરુણઃ સમીચ્યા ।
યમો રાજા પ્રમૃણાભિઃ પુનાતુ મા જાતવેદા મૂર્જયંત્યાપુનાતુ ॥ ખિ૯-૩.૧.૨ ॥

ઋષયઃ તુ તપસ્તેપુઃ સર્વે સ્વર્ગં જિગીષવઃ ।
તપંતસ્તપસોગ્રેણ પાવમાનીઋચોઽબ્રુવન્ ॥ ખિ૯-૩.૧.૨ ॥

યન્મેગર્ભે વસતઃ પાપમુગ્રં યજ્જાયમાનસ્ય ચ કિઞ્ચિદન્યત્ ।
જાતસ્ય ચ યચ્ચાપિ ચ વર્ધતો મે તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૨.૨ ॥

માતાપિત્રોર્યન્ન કૃતં વચો મે યત્સ્થાવરં જઙ્ગમમાબભૂવ ।
વિશ્વસ્ય તત્પ્રહૃષિતં વચો મે તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૨.૨ ॥

ગોઘ્નાત્તસ્કરત્વાત્ સ્ત્રીવધાદ્યચ્ચ કિલ્બિષમ્ ।
પાપકં ચ ચરણેભ્યસ્તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૨.૨ ॥

બ્રહ્મવધાત્સુરાપાનાત્સ્વર્ણસ્તેયાત્વૃષલિગમનમૈથુનસઙ્ગમાત્ ।
ગુરોર્દારાધિગમનાચ્ચ તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૨.૨ ॥

બાલઘ્નાન્માતૃપિતૃવધાદ્ભૂમિતસ્કરાત્સર્વવર્ણગમનમૈથુનસઙ્ગમાત્ ।
પાપેભ્યશ્ચ પ્રતિગ્રહાત્સદ્યઃ પ્રહરતિ સર્વદુષ્કૃતં તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૨.૨ ॥

ક્રયવિક્રયાદ્યોનિદોષાદ્ભક્ષાદ્ભોજ્યાત્પ્રતિગ્રહાત્ ।
અસમ્ભોજનાચ્ચાપિ નૃશંસં તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૨.૨ ॥

દુર્યષ્ટં દુરધીતં પાપં યચ્ચાજ્ઞાનતો કૃતમ્ ।
અયાજિતાશ્ચાસંયાજ્યાસ્તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૩.૨ ॥

અમન્ત્રમન્નં યત્કિઞ્ચિદ્ધુયતે ચ હુતાશને ।
સંવત્સરકૃતં પાપં તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૩.૨ ॥

ઋતસ્યયોનયોઽમૃતસ્યધામ વિશ્વાદેવેભ્યઃ પુણ્યગન્ધાઃ ।
તા ન આપઃ પ્રવહન્તુ પાપં શુદ્ધાગચ્છામિ સુકૃતામુલોકં તત્પાવમાનીભિરહં પુનામિ ॥ ખિ૯-૩.૩.૨ ॥

પાવમાનીઃ સ્વસ્ત્યયનીર્યાભિર્ગચ્છતિ નાન્દનમ્ ।

પુણ્યાંશ્ચ ભક્ષ્યાન્ભક્ષયત્યઽમૃતત્વં ચ ગચ્છતિ ॥ ખિ૯-૩.૩.૨ ॥

પાવમાનીઃ પિતૄન્દેવાન્ધ્યાયેદ્યશ્ચ સરસ્વતીમ્ ।
પિતૄન્ તસ્યોપવર્તેતત્ક્ષીરં સર્પિર્મધૂદકમ્ ॥ ખિ૯-૩.૩.૨ ॥

પાવમાનં પરં બ્રહ્મ શુક્રં જ્યોતિઃ સનાતનમ્ ।
ઋષીંતસ્યોપતિષ્ઠેતત્ક્ષીરં સર્પિર્મધૂદકમ્ ॥ ખિ૯-૩.૩.૨ ॥

પાવમાનં પરં બ્રહ્મ યે પઠન્તિ મનીષિણઃ ।
સપ્તજન્મ ભવેદ્વિપ્રો ધનાઢ્યો વેદપારગાઃ ॥ ખિ૯-૩.૩.૨ ॥

દશોત્તરાણ્યૃચાંશ્ચૈવ પાવમાનીઃ શતાનિ ષટ્ ।
એતજ્જુહ્વન્જપેન્મન્ત્રં ઘોરમૃત્યુભયં હરેત્ ॥ ખિ૯-૩.૩.૨ ॥

એતત્ પુણ્યં પાપહરં રોગ મૃત્યુ ભયાવહમ્ ।
પઠતાં શ઼ૃણ્વતાં શ્ચૈવ દદાતિ પરમાં ગતિમ્ ॥ ખિ૯-૩.૩.૨ ॥

---

*Pavamanasuktam from Rigveda*

pdf was typeset on June 11, 2024

Please send corrections to *sanskrit@cheerful.com*